TABLE OF CONTENTS

Printed by :—S. R. Sardesai, B.A., LL.B., Navin Samarth Vidyalaya's 'Samarth Bharat Press', 41 Budhwar Peth, Poona 2.

blished by :—Dr. N. G. Sardesai, L.M. & S., for the Oriental Book Agency, 15 Shukrawar, Poona 2.

PREFACE

The Cārudatta attributed to Bhāsa is of perennial interest to the student of Sanskrit literature, as it has given rise to the tantalising problem as to whether it is the original of the Mṛcchakaṭika, or an abridgment thereof. It is probable that there is a third alternative to the problem viz. the possibility that the Cārudatta is an abridgment of the play 'Daridra-Cārudatta' which is referred to as a Rūpaka by many rhetoricians, and the relation between these three plays will be a matter for further research. We have proceeded on the assumption that 'Daridra-Cārudatta' is but an alternative title of the Mṛcchakaṭika for reasons given in the introduction. In any case there could be no reasonable doubt that if such a play as the 'Daridra-Cārudatta' has an independent existence, yet there must be a very close, and in fact, a genetic relation between all the three plays.

The present edition is based upon Gaṇapati Śāstri's edition, with occasional references to Morgenstierne's text as given in his "Über das Verhältnis Zwischen Cārudatta und Mṛcchakaṭika". I have made use of Gaṇapati Śāstri's commentary in translating and annotating, and have further referred to Woolner's translation. I here make my grateful acknowledgments to all these writers.

I take this opportunity of expressing my gratitude to Dr N. G. Sardesai, who has undertaken to bring out this publication and lastly my thanks are due to Mr. S. R. Sardesai, B.A., LL.B., the manager of the Samartha Bharat Press, for the very nice printing and get-up of the work.

Prabhākara Niketana,
Deccan Gymkhana, Poona 4
29 June 1939

C. R. Devadhar

DRAMATIS PERSONÆ

Male :—

1.	Nâyaka ...	... Cārudatta.
2.	Vidūşaka ...	... Maitreya, friend to Cārudatta
3.	Śakāra ...	... Saṃsthāna, a brother-in-law of the king.
4.	Viṭa ...	... The parasitical companion of Śakāra.
5.	Samvāhaka ...	... a Shampooer.
6.	Cheṭa ..	. a servant to Vasantasenā.
7.	Sajjalaka ...	... Lover of Madanikā.
8.	Vardhamānaka	. . a Servant in Cārudatta's house.

Female :—

1.	Gaṇikā ...	.. The Courtesan Vasantasenā.
2.	Brāhmaṇī ...	... Wife of Cārudatta.
3.	Radanikā ...	... A maid-servant of Cārudatta.
4.	Madanikā ..	. A maid-servant and confidante of Vasantasenā.
5.	Vicchittikā...	} Maids in Vasantasenā's house.
6.	Caturikā ...	

Besides these, there are the usual stage-manager and his wife, the actress.

INTRODUCTION

The Cārudatta presents a very interesting problem to the student of literature. As I have remarked elsewhere* it stands apart from the group and has peculiarities which are not shared by the rest of the plays—such as the absence of the introductory verse, of the Bharatavākya and the comparative prolixity of the prologue, in which again, contrary to usual practice the Sūtradhāra speaks Prākṛta. There is, moreover, no agreement in regard either to imagery, vocabulary, incidents and devices or dramatic irony, which is to be seen in the remaining plays. Recurrences such as the use of the words सोत्कण्ठता, (प्रतिमा, अभिषेक), परिस्पन्द (पञ्चरात्र), or of the sentences को कालः (प्रतिज्ञा, स्वप्न॰) or अलमिदानीं भवान् अतिमात्रं संतप्य । (स्वप्न॰ and अविमारक), सव्वं आणेदु पत्तिअ सोभणं (स्वप्न IV") are neither numerous, nor peculiar so as to support the idea of common authorship. The stanza लिम्पतीव तमोऽङ्गानि etc which is common to Cārudatta and Bālacarita is to be met with in the Mṛcchakaṭika also.

The Cārudatta is unknown to Sanskrit writers. There are numerous references to a play Daridra-Cārudatta, but these are in the first place references to a complete play and not to a fragment or what appears like one, and secondly, they are more likely than not references to the Mṛcchakaṭika. The Daridra-Cārudatta is cited both in the Nāṭyadarpaṇa and the Abhinavabhāratī as a 'Rūpaka' (which is a play comprising between five to ten acts) in the course of a discussion on free will and determination in its relation to the dramatic art (अतो दैवायत्तफले दरिद्रचारुदत्तादिरूपके पुरुषव्यापारस्य गौणत्वात्कथं प्रारम्भाद्य स्युः) This clearly refers to a conclusion which is brought about by 'Destiny' as in the Mṛcchakaṭika, where Cārudatta is saved from the gallows purely through the sudden turn of fortune in his favour when he himself had abandoned all hope of life. The

* Vide my "Plays ascribed to Bhāsa, their authenticity and merits"

Daridra-Cārudatta cannot be the present play for the simple reason that in none of the Mss. is it called so, nor in the body of the play is the hero ever described as दरिद्रचारुदत्तः, but always as दरिद्रसार्थवाहपुत्र चारुदत्तः. In the Mṛcchakaṭika, however, the expression दरिद्रचारुदत्त occurs as many as eight times, and when we remember that our rhetoricians are in the habit of using alternative titles like वत्सराजचरितम् and रत्नावली for रत्नावली, we need make no doubt that the दरिद्रचारुदत्त referred to as a रूपक is no other than the मृच्छकटिक.

In regard to the relation between the Cārudatta and Mṛcchakaṭika, opinion is sharply divided, some believing that the latter is a mere amplified replica of the former, while others hold the opinion that the Cārudatta is a mere abridgment of the Mṛcchakaṭika. As I have thoroughly discussed this question elsewhere, I need only assert here my view that the Cārudatta is abridged from the first four acts of the Mṛcchakaṭika, with a few additions and numerous alterations particularly in the verse portions. It gives us 55 verses for 143 verses in the corresponding portion of the Mṛ. out of which as many as 11 are altogether new. The remaining 44 are common to the two plays, but most of these have lost their smoothness and polish in the altered form in which they are presented in the Cārudatta.

The main differences in the two versions may here be enumerated :—The most important of these is the complete absence of the political background which practically permeates the play मृच्छकटिक. Thus in the prologue there is a reference to king Pālaka (कदा नु लग्नं रथ्यां कुपितेन राज्ञा पालकेन नववधूकेशकलापमिव ससुगन्धं छिद्यमानं प्रेक्षिष्ये). In act II Darduraka after his scuffle with Māthura, the keeper of the gambling house, refers to the forces of discontent that were rallying round आर्यक (कथितं च मम प्रियवयस्येन शर्विलकेन यथा किल

आर्यकनामा गोपालदारक, सिद्धादेशेन समादिष्टो राजा भविष्यति । सर्व-आश्रयिणो जनः तमनुसरति) In act IV there is the proclamation that king Pālaka, disturbed by the seer's prophesy has arrested Āryaka and flung him in a dungeon, whereupon Śarvilaka, who has just secured Madanikā for wife, leaves her to take care of herself and himself proceeds to join his revolutionary comrades The Cārudatta studiously drops all these references

There is further no mention of Cārudatta's son Rohasena. In the Mr. the child is spoken of as having come out of the inner court to enjoy the cool evening breeze and of having dropped into sleep outside, hence the hero asks Vasantasenā, whom he mistakes for his maid Radanikā, to wrap the child with his mantle and take it inside the house The Cārudatta, however, drops all reference to Rohasena but in so doing, does not succeed in covering up all traces of the abridgment, for it retains the sentence प्रवेश्यतां अभ्यन्तरम् *of the* मृच्छकटिक *where the causal* प्रवेश्यतां is all right since the maid is asked to take the child inside the house, while in the Cārudatta प्रवेश्यतां causal becomes meaningless and ungrammatical.

Similarly there is no reference to a suit in the law-court (अधिकरणे व्यवहार) The servant of Śakāra (the चेट of the मृच्छकटिक) is not at all mentioned, and last there is a very great change in the conception of the characters, particularly that of the विट.

To my mind all these changes are made with a definite purpose The author of the Cāruddatta, whosoever he was,
acts
es to
w-suit
e has
given us a stage version of the first four acts and has
not
sub-
the
the
for

a golden cart in place of his clay-cart gives Vasantasenā a pretext for once more leaving her ornaments in Cārudatta's house, and the political back-ground all these are meticulously avoided by our author The remark अयमितं चारुदत्तम् represents to my mind the real state of affairs. The end of the fourth act (अमृताङ्क नाटकाङ्क सवृत्त , and इत्ताशो मा खलु वर्धय) seems to point to the same conclusion that the author wants to give finality to the play

With regard to the तिथि scheme which is introduced by our author (रदनिके, गृहाणेतं सुवर्णालिकारं स्वम् । षष्ठ्यां सप्तम्यां च धारय । अष्टमहस्याममनस्यायें धारयिष्यामि ।) we feel that confusion is worse confounded, for it necessitates the assumption that the entire action of the story covers but three days; for in the third act, when the, Vidūṣaka returns home after the concert he is reminded by the maid that it was the eighth day (the same fact is indicated by the verse असौ हि दत्त्वा. . अष्टमचन्द्र) and hence he was to take charge of the ornaments Now in the first act the moon is described as rising up at about 9-30 or 10 p m which shows that it was कृष्णपक्ष , while in act III the same is described as setting sometime after midnight, which clearly indicates शुक्लपक्ष. This leads to the asumption that over a fortnight must have elapsed between the first and third act But what then would happen to the Tithi Scheme? Vasantasenā left her ornaments with Cārudatta on षष्ठी they were in the keeping of the maid on षष्ठी and सप्तमी and were handed over after midnight on the अष्टमी day to the Vidūṣaka when he returned from the music concert, and were stolen from him towards dawn by Śarvilaka This is a very serious inadvertence from which the Mṛcchakaṭika is happily free, although it is not quite clear in regard to its time-sequence

With regard to the Prākṛta of the play, we find that Saṃvāhaka, who speaks मागधी in the मृच्छकटिक, speaks the usual शौरसेनी here The Śakāra speaks मागधी as in the Mṛcchakaṭika, with his peculiar idiosyncracy of using the palatal श for the dental स.

चारुदत्तस्य कथावस्तु ।

चारुदत्तो नाम कश्चिन् सार्थवाहपुत्रो विप्र उदारतायाऽधिपु ललितविभव-
सर्वस्व उज्जयिन्यां श्रेष्ठिचत्वरे निवसति स्म । तस्मिन् दृढमनुरक्ता वसन्त-
सेना नाम गणिका । अथ कदाचिद्राजवीथ्यां गच्छन्ती सा विटचेट्यादिभि राज-
श्यालेन शकारेणानुगम्यमाना संभ्रान्ता प्रदोषान्धकारपूरितमार्गायां रथ्यायां
दैवाच्चारुदत्तस्य भवनं प्राप्ता तस्मात् गृहात् दीपं गृहीत्वा निष्क्रामन्तीं चारु-
दत्तचेटीं रदनिकां दृष्ट्वा पटाञ्चलेन दीपं निर्वाप्याभ्यन्तरं प्रविष्टा । अथ विटेन
प्रोत्साहितो राजश्यालो वसन्तसेनाबुद्ध्या रदनिकां यावद् बलाद्ग्रहीतुमारभते
स्म तावच्चारुदत्तवयस्यो मैत्रेयो दीपं गृहीत्वा तत्र प्राप्तः । स च तेन
प्रधर्षितां चेटीं दृष्ट्वा भृशमेनं निर्भर्त्सयामास । अथ शकारो भवनगामा वसन्त-
सेना त्वया मे निर्यातयितव्या इति चारुदत्तं संदिश्य निष्क्रान्तः । वसन्तसेना
तु परिचारिकाभ्रान्त्या चारुदत्तेनाभ्यन्तरप्रवेशनायार्पितं सुमनोवासितं प्रावारकं
गृहीत्वा विवर्धितमदना संवृत्ता । अनुपदमेव विदूषकरदनिकाप्रवेशाच्चारुदत्त
स्य प्रमादं ज्ञातवान् । वसन्तसेनाप्यभयमेनं ययाचे । तस्य हस्ते च स्वीया
सुवर्णालंकारान् निक्षिप्यार्यमैत्रेयेणानुगता स्वभवनं प्रतिनिवृत्ते ।

ततोऽन्येद्युश्चारुदत्तसंवाहको द्यूतोपजीवी द्यूतकरभयात् वसन्तसेनाभ
प्रविष्ट शरणागतस्याभयदानेन विश्रमितश्चारुदत्तगुणान् प्रशशंस । अन
तद्याधेः कर्णपूरं आरभम' परित्यज्य वर्णयितुमारब्ध' । अनेन हि मो
कोऽपि वराकः प्रमाजको हस्तिहस्तमभिमर्दान् । ततोऽस्य पराक्रमेण तुष्टा
प्रसमागमन' प्रावारकं दत्तवान् । ततोऽस्य गुणानुरागिण्यमौदार्यं च विम
वसन्तसेना दृढमुत्कण्ठितासीत् ।

अथ कदाचिद्वसन्तसेनाचेट्या मदनिकायाः कामुकः सज्जलको नाम
भुजिष्यां कर्तुं प्रवृत्तस्तस्या निष्क्रयार्थं रात्रौ चारुदत्तगृहे सन्धिं कृत्वा
सेनया निक्षिप्तं सुवर्णभाण्डमपजहार । तच्च गृहीत्वा वसन्तसेनागृ
मदनिकायै साहसं स्वीयं निवेदयामास । तिरस्करिणितया वसन्तसेनय
तद्दृष्टम् । अथ प्रातश्चारुदत्तसकाशमागतो विदूषकः “ सुवर्णभाण्ड

शान्ति " इत्यादिना [illegible] चारुदत्तस्य [illegible] [illegible] [illegible] प्रापत्। [illegible] [illegible] 'चार्वङ्गी [illegible]' इति [illegible] वर्णितम्। तथा तु [illegible] [illegible] [illegible] प्रस्तावनायाः। अस्मिंस्तु [illegible] [illegible] [illegible] मदनिका [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]। [illegible] च [illegible] [illegible]।

पात्राणि।

पुरुषाः—

चारुदत्तः—दरिद्रसार्थवाहपुत्रः चारुदत्तः।

विदूषकः—(मैत्रेयः) चारुदत्तस्य मित्रम्।

शकारः—राजश्यालः संस्थानकः।

विटः

संवाहकः

चेटः—(मृच्छकटिके कर्णपूरकः) वसन्तसेनायाः किङ्करः।

सज्जलकः—(मृच्छकटिके शर्विलकः) मदनिकाकामुकः।

स्त्रियः—

गणिका—वसन्तसेना।

ब्राह्मणी—चारुदत्तस्य पत्नी।

रदनिका—चारुदत्तगृहे चेटी।

मदनिका—वसन्तसेनायाः सखी चेटी च।

IMPORTANT NOTE

As the Sanskrit text of this edition is thoroughly :vised, and repaginated, readers are requested to note ıat in referring to the notes, they should add two to the umber of the page reference ; thus notes on page one of otes should be read as notes for page three of the text nd so on.

श्रीगणेशाय नमः।

भासनाटकचक्रे

चारुदत्तम्

(नान्द्यन्ते ततः प्रविशति सूत्रधारः ।)

सूत्रधारः—किन्नु अत्र पच्चूस एव्व गेहादो णिग्गन्तस्स बुभुक्खाए पुक्खरपत्तपडिदजलबिन्दू विअ चञ्चलाअन्ति विअ मे अक्खीणि। (परिक्रम्य) जाव गेहं गच्छिअ जाणामि किण्णु खु संविधा विहिदा ण वेत्ति। (परिक्रम्य) एदं अम्हाणं गेहं। जाव पविसामि। (प्रविश्यावलोक्य) अह ओदीरिअवट्टणकालमारा भूमी, लेवणभाअणसुगन्धो विअ गन्धो, सुणिमित्तं विअ परिब्भमन्तो बहिदरमअजणो, किण्णु संविधा विहिदा। आदु बुभुक्खाए ओदणमअं विअ जीवलोअं पेक्खामि। जाव अय्यं सद्दावेमि। अय्ये ! इदो दाव। [किन्नु खल्वद्य प्रत्यूष एव गेहान्निष्क्रान्तस्य बुभुक्षया पुष्करपत्रपतितजलबिन्दू इव चञ्चलायेते इव मेऽक्षिणी। यावद् गेहं गत्वा जानामि किन्नु खलु संविधा विहिता न वेति। एतदस्माकं गेहम्। यावत् प्रविशामि। यथा ओदीरितवर्तनकालसारा भूमिः, स्नेहोद्भावनसुगन्ध इव गन्धः, सुनिमित्तमिव परिभ्रमन् युवतिजनः, किन्नु खलु संविधा विहिता। अथवा बुभुक्षयौदनमयमिव जीवलोकं पश्यामि। यावदार्यां शब्दापयामि। आर्ये ! इतस्तावत्।]

नटी—अय्य ! इअम्हि। अय्य ! दिट्ठिआ सुसि आअदो। [आर्य ! इयमस्मि। आर्य ! दिष्ट्या स्वागतः।]

सूत्रधारः—अय्ये ! किं अत्थि अम्हाणं गेहे को वि पादरासो। [आर्ये ! किमस्त्यस्माकं गेहे कोऽपि प्रातराशः।]

नटी–अत्थि। [अस्ति।]

सूत्रधारः–चिरं जीव। एवं सोभणाणि भोअणाणि दाइआ होहि। [चिरं जीव। एवं शोभनानि भोजनानि दात्री भव।]

नटी–अय्य! तुवं एव्व पडिवालअन्ती चिट्ठामि। [आर्य! त्वामेव प्रतिपालयन्ती तिष्ठामि।]

सूत्रधारः–अय्ये! किं अत्थि अब्भत्थिदं। [आर्ये! किमस्त्यभ्यर्थितम्।]

नटी–अत्थि। [अस्ति।]

सूत्रधारः–एवं देवा तुमं अप्पाअअन्तु। अय्ये! किं किं। [एवं देवास्त्वामाप्याययन्तु। आर्ये! किं किम्।]

नटी–घिदं गुळो दहिं तण्डुला अ अत्थि। [घृतं गुडो दधि तण्डुलाश्चास्ति।]

सूत्रधारः–एदं सव्वं अम्हाणं गेहे अत्थि। [एतत् सर्वमस्माकं गेहेऽस्ति।]

नटी–णहि णहि। अन्तळावणे। [नहि नहि। अन्तरापणे।]

सूत्रधारः–(सरोषम्) आः अणय्ये! एवं दे आसा छिन्दीअदु। अभावं च गमिस्ससि। अहं चण्डप्पवादळण्डुओ विअ वरण्डो पव्वदादो दूरं आरोविअ पाडिदो म्हि। [आः अनार्ये! एवं ते आशा छिद्यताम्। अभावं च गमिष्यसि। अहं चण्डप्रवातलण्डित इव वरण्डः पर्वताद् दूरमारोप्य पातितोऽस्मि।]

नटी–मा भाआहि मा भाआहि। मुहुत्तअं पडिवाळेदु अय्यो। सव्वं सज्जं भविस्सदि। लद्धं णाम एदं। अज्ज मम उववासस्स अय्यो सहायो होदु। [मा बिभीहि मा बिभीहि। मुहूर्तकं प्रतिपालयत्वार्यः। सर्वं सज्जं भविष्यति। लब्धं नामैतत्। अद्य ममोपवासस्यार्यः सहायो भवतु।]

बहुमतकैः परिवृत आकण्ठमात्रमशित्वा मत्सरवृषभ इव मोदक रोमन्थायमानो दिवसं भिनद्मि, स इदानीमहं तत्रभवतश्चारुद दरिद्रतया मम पारावतैः साधारणवृत्तिर्जीवन् अन्यत्र चरि चरित्वा तस्यावासमेव गच्छामि। अन्यथाश्रयम्। ममोदरमवध्या चोरं जानाति। अन्येनापि तुष्यति। बहुकम्प्यौदनमदं मरिष्यति दी मानम्। न याचते अदीयमानं, न प्रत्याचष्टे। न स्वल्पदर्शनेन सन्तुष्टः। तत् पूर्वकृतदेवकार्यस्य तत्रभवतश्चारुदत्तस्य कारणाद् गृह तानि सुमनसोऽन्तरीयकाणि च। यावदस्य पार्श्वपरिवर्ती भवामि। ए तत्रभवांश्चारुदत्तः प्रभातचन्द्र इव सकरुणप्रियदर्शनो यथाविभवेन गृ दैवतान्यर्चयन् इत एवागच्छति। यावदेनमुपसर्पामि।]

(ततः प्रविशति यथानिर्दिष्टो नायको विदूषकश्चाङ्गेरिकाहस्ता चेटी च।

नायकः—(दीर्घं निःश्वस्य) भोः! दारिद्र्यं खलु नाम मनस्विन पुरुषस्य सोच्छ्वासं मरणम्। कुतः,

यासां बलिर्भवति मद्गृहदेहलीनां
हंसैश्च सारसगणैश्च विमुक्तपुष्पः।
तास्वेव पूर्वबलिरूढयवाङ्कुरासु
बीजाञ्जलिः पतति कीटमुखावलीढः॥ २॥

विदूषकः—अलं दाणि भवं अदिमत्तं सन्तप्पिदुं। पुरुसजोव्वणाणि विअ गिहजोव्वणाणि खु दसाविसेसं अणुहोन्ति। आसमुद्दआण विपण्णविभवस्स बहुलपक्खचन्दस्स जोण्हापरिक्खओ विअ भवदो एव्व रमणीओ अअं दरिद्दभावो। [अलमिदानीं भवान तिमात्रं सन्तप्तुम्। पुरुषयौवनानीव गृहयौवनानि खलु दशाविशेष मनुभवन्ति। आसमुद्रदानविपन्नविभवस्य बहुलपक्षचन्द्रस्य ज्योत्स्ना परिक्षय इव भवत एव रमणीयोऽयं दरिद्रभावः।]

चारुदत्तः — [illegible] तु
पुरुषस्य [illegible] दहति । कुतः

सुखं हि दुःखान्यनुभूय शोभते
यथान्धकारादिव दीपदर्शनम् ।
सुखात्तु यो याति दशां दरिद्रतां
स्थितः शरीरेण मृतः स जीवति ॥ ३ ॥

विदूषकः — भो वअस्स ! अणुदिवसणक्खत्तपुरो दारिद्दो [illegible]
वट्टदि [illegible] । [भो वयस्य ! [illegible]
१ [illegible] ।]

चारुदत्तः — (निःश्वस्य) वयस्य ! [illegible] मे भागधेयानि ।
कुतः,

क्षीणा ममार्थाः प्रणयिक्रियासु
विचारितं नैव परं स्मरामि ।
एतत्तु मे प्रत्ययदत्तमूल्यं
सत्त्वं सखे ! न क्षयमभ्युपैति ॥ ४ ॥

(चिन्तां नाटयति ।)

विदूषकः — किं भवं अत्थविभवं चिन्तेदि । [किं भवानर्थविभवं
२ चिन्तयति ।]

चारुदत्तः —

सत्यं न मे धनविनाशगता विचिन्ता
भाग्यक्रमेण हि धनानि पुनर्भवन्ति ।
एतत्तु मां दहति नष्टधनश्रियं मे
यत् सौहृदानि सुजने शिथिलीभवन्ति ॥ ५ ॥

९

अपि च,

दारिद्र्यात् पुरुषस्य बान्धवजनो वाक्ये न सन्तिष्ठते
सत्त्वं हास्यमुपैति शीलशशिनः कान्तिः परिम्लायते ।
निर्वैरा विमुखीभवन्ति सुहृदः स्फीता भवन्त्यापदः
पापं कर्म च यत् परैरपि कृतं तत्तस्य सम्भाव्यते ॥ ६ ॥

विदूषकः—एदे दाणि दासीएउत्ता अत्थवावारा गोवदारआ विअ मसअभीदा गिहादो णिग्गच्छन्ति । धणविणासदुक्खस्स उण चिन्तिअमाणस्स वसन्ते वुक्खस्स सरत्थम्भस्स विअ अङ्कुर-ङ्कुरा उब्भमन्ति । ता अलं भवदो सन्दावेण । [एत इदानीं दास्याः पुत्रा अर्थव्यापारा गोपदारका इव मशकभीता गृहाद् निर्गच्छन्ति । धनविनाशदुःखस्य पुनश्चिन्त्यमानस्य वसन्ते वृक्षस्य शारस्तम्बस्ये-वाऽङ्कुराङ्कुरा उद्भ्रमन्ति । तदलं भवतः सन्तापेन ।]

नायकः—वयस्य ! किमर्थं सन्तापं करिष्ये । किञ्चाहं दरिद्रः, यस्य मम,

विभवानुवशा भार्या समदुःखसुखो भवान् ।
सत्त्वं च न परिभ्रष्टं यद् दरिद्रेषु दुर्लभम् ॥ ७ ॥

(ततः प्रविशति गणिका सम्भ्रान्ता विटेन शकारेण चानुगम्यमाना ।)

शकारः—चिट्ठ चिट्ठ वशन्तशेणिए ! चिट्ठ

किं याशि धावशि पधावशि पक्खलन्ती
शाहु प्पशीद ण मलीअशि चिट्ठ दाव ।
कामेण दम्पदि हि जज्झइ मे शलीलं
अङ्गालमज्झपडिदे विअ चम्मखण्डे ॥ ८ ॥

१ [तिष्ठ तिष्ठ वसन्तसेने तिष्ठ,

किं यासि धावसि प्रधावसि प्रस्खलन्ती
वासु प्रसीद न मरिष्यसे तिष्ठ तावत् ।
कामेन सम्प्रति हि दह्यते मे शरीर-
मङ्गारमध्यपतितमिव चर्मखण्डम् ॥ ८ ॥]

विटः—वसन्तसेने !

किं त्वं भयेन परिवर्तितसौकुमार्या
नृत्तोपदेशविशदौ चरणौ क्षिपन्ती ।
उद्विग्नचञ्चलकटाक्षविसृष्टदृष्टि-
र्व्याधानुसारचकिता हरिणीव यासि ॥ ९ ॥

शकारः—भावे ! एशा गश्चदि वशन्तशेणिआ,
दुवेहि अम्हेहि अणुबन्धअन्ती अद्धा शिआली विअ कुक्कुलेहि ।
शणूपुला मेहलणादहाशा शवेदूणं मे हलअं हलन्ती ॥ १० ॥
[भाव ! एषा गच्छति वसन्तसेना,
द्वाभ्यामावाभ्यामनुबध्यमाना यथा शृगालीव कुक्कुराभ्याम् ।
सनूपुरा मेखलानादहास्या सवेदनं मे हृदयं हरन्ती ॥ १० ॥]

विटः—वसन्तसेने !

किं त्वं पदात् पदशतानि निवेशयन्ती
नागीव यासि पतगेन्द्रभयाभिभूता ।
वेगादहं प्रचलितः पवनोपमेयः
किं त्वां ग्रहीतुमथवा न हि मेऽस्ति शक्तिः ॥ ११ ॥

गणिका—(समन्तादवलोक्य) पल्लवअ ! पल्लवअ ! परहुदिए !
परहुदिए ! मदुअरअ ! मदुअरअ ! सारिए ! सारिए ! हद्धि,
णट्ठो मे परिअणो । एत्थ सअं एव्व अप्पा रक्खिदव्वो । [पल्लवक !

पलवक ! परभृतिके ! परभृतिके ! मधुकरक ! मधुकरक ! शारिके ! शारिके ! । हा धिक्, नष्टो मे परिजन. । अत्र स्वयमेवात्मा रक्षितव्यः ।]

६ शकारः–विळव विळव णाए ! विळव पळ्ळवं वा, परहुदिअं वा, महुअरं वा, शाळिअं वा, शव्वं वशन्तमाशं वा। के के तुमं पलित्तअशि ।

किं वाशुदेवे शवपट्टणेशे
कुन्तीशुदे वा जणमेजए वा ।
अहं तुमं गण्हिअ केशहत्थे
दु:शाशळे शीदमिवाहळामि ॥ १२ ॥

[विलप विलप शाते ! विलप पल्लवं वा, परभृतिकां वा, मधुकरं वा, शारिकां वा, सर्वं वसन्तमासं वा । कः कस्त्वां परित्रास्यते ।
किं वासुदेवः शवपत्तनेशः कुन्तीसुतो वा जनमेजयो वा ।
अहं त्वां गृहीत्वा केशहस्ते दुःशासनः सीतामिवाहरामि ॥ १२ ॥]

विटः–वसन्तसेने ! सर्वत्र भयानभिज्ञहृदयं मां कुरु। पश्य,

परिचिततिमिरा मे शीलदोषेण रात्रि-
र्बहुलतिमिरकालास्तीर्णपूर्वा विपट्टाः ।
युवतिजनसमक्षं काममेतन्न वाच्यं
विपणिषु हतशेषा रक्षिणः साक्षिणो मे ॥ १३ ॥

गणिका–हं इदाणिं संसइदा संवुत्ता, जो अप्पगुणाणि सअं एव्व मन्तेदि। कहं एदे अकय्यं ण करिस्सन्दि। [अहम् इदानीं संशयिता संवृत्ता, य आत्मगुणान् स्वयमेव मन्त्रयते। कथमेतेऽकार्यं न करिष्यन्ति।]

विटः–भवति ! क्रियतामस्माकमनुनयग्रहः। पश्य,

जनयति खलु रोषं प्रश्रयो भिद्यमानः
किमिव च वनितानां दुष्करं मद्विधानाम्।
अनुनयति समर्थः खड्गदीर्घः करोऽयं
युवतिवधघृणाया मां शरीरं च रक्ष ॥ १४ ॥

गणिका–अणुणओ वि सु से भाएदि। [अनुनयोऽपि खल्वस्य भाययति।]

शकारः–बसन्तसेणिए! शुद्दु भावे भणादि। बहुमण्णिअदि दाव बल्लिअजणदुल्लहे अणुणए। पेक्ख दाव।

अशि खलु तिक्खे शिहिणीविसेभए
णिवेमि शीशं तव मालए हवा।
अलं सु अम्हाणिहाकाणि छोशिअ
मडे सु जो होइ ण णाम जीवइ ॥ १५ ॥

[बसन्तसेने! सुष्ठु भावो भणति। बहुमान्यते खलु तावद् बालवज्र-भदुर्लभोऽनुनयः। पश्य तावत्।
असिः खलु तीक्ष्णः शिखिग्रीवामेचकः क्षिपामि शीर्षं तव मारयेऽथवा।
अलं त्वस्मात्कोपात् रोषयित्वा मृतः खलु यो भवति न नाम जीवति॥१५]

गणिका–अय्य! कुलउत्तजणस्स सीलपरितोसोवजीविणी गणिआ सु अहं। [आर्य! कुलपुत्रजनस्य शीलपरितोषोपजीविनी गणिका खल्वहम्।]

विटः–अतः खलु प्रार्थ्यसे।

गणिका–अय्य! इमादो जणादो किं इच्छीअदि सरीरं वा आदु अलङ्कारो वा। [आर्य! अस्माज्जनात् किमिष्यते शरीरं वाथवा-लङ्कारो वा।]

विटः–न पुष्पमोक्षणमर्हति लता। कृतम——

९ गणिका–अहं मु दाणि अत्ताणं ण सम्भाविअं। [अहं गणिका-
भिमानमानं न सम्भावयेयम्।]

१२ शकार–वशन्तशेणिए ! अहं भट्टिपुत्ते कामइदव्वे। [वसन्तसेने
अहं भर्तृपुत्रः कामयितव्यः।]

गणिका–सन्तो म्हि। [शान्तोऽस्मि।]

१५ शकारः–शुणाहि भावे ! शुणाहि। एशा वशन्तशेणिआ मं शन्तो
शि त्ति भणादि। [शृणु भाव! शृणु। एषा वसन्तसेना मां
श्रान्तोऽसीति भणति।]

१८ विटः–(आत्मगतम्) आत्मप्रमाणमात्मानं न जानाति मूर्खः। ध्वंस
इत्युक्ते श्रान्त इत्यवगच्छति। अपि च,

अभिनयति वचांसि सर्वगात्रैः
किमपि किमप्यनवेक्षितार्थमाह।
अनुचितगतिरप्रगल्भवाक्यः
पुरुषमयस्य पशोर्नवावतारः ॥ १६ ॥

(प्रकाशम्) वसन्तसेने ! किमिदं मत्सन्निधौ वेशवासविरुद्धम-
भिहितम्। पश्य,

तरुणजनसहायश्चिन्त्यतां वेशवासो
विगणय गणिका त्वं मार्गजाता लतेव।
वहसि हि धनहार्यं पण्यभूतं शरीरं
सममुपचर भद्रे ! सुप्रियं चाप्रियं च ॥ १७ ॥

गणिका–एसो मे अभिणिवेसो अभिजणेण तुळीअदि। [एष
मेऽभिनिवेशोऽभिजनेन तोल्यते।]

३ शकारः–भावे ! एशा अन्धआळपूळिदगम्भीळा ळच्छा दीशइ।
मा खु णाए एत्थ भंशाइदव्वा। आ कामदेवाणुआणप्पहुदि णअण-

मअणाणुरुत्ते दरिद्दसत्थवाहउत्तं चारुदत्तवडुअं कामेदि एसा। इदं तस्स गेहस्स पक्खदुआरं। [भाव! एषान्धकारपरिगर्भिता रथ्या दृश्यते। मा खलु नाना अत्र प्रविशेष्यति। आ कामदेवायतनात् प्रभृति मदनानुरक्ता दरिद्रसार्थवाहपुत्रं चारुदत्तवटुकं कामयत एषा। इदं तस्य गृहस्य पक्षद्वारम्।]

गणिका—(स्पर्शमभिनयन्ती) एदं तस्स गेहं। दिट्ठिआ दाणि असिलज्जणणिरोहेण पिअजणसमीवं उवणीदम्हि। भोदु, एव्व दाव करिस्सं (अपसरति।) [एतत् तस्य गेहम्। दिष्ट्येदानीमभिन्नजननिरोधेन प्रियजनसमीपमुपनीतास्मि। भवतु, एवं तावत् करिष्यामि।]

शकारः—(विलोक्य) भावे! णट्ठा णट्ठा। [भाव! नष्टा नष्टा।]

विटः—कथं नष्टा। अन्विष्यतामन्विष्यताम्।

शकारः—भावे! ण दिस्सदि। [भाव! न दृश्यते।]

विटः—हन्त छलिताः स्मः। वसन्तसेने! उपलक्ष्येदानीमसि।

कामं प्रदोषतिमिरेण न दृश्यसे त्वं
सौदामिनीव जलदोदरसन्निरुद्धा।
त्वां सूचयिष्यति हि वायुवशोपनीतो
गन्धश्च शब्दमुखराणि च भूषणानि॥ १८॥

(गणिका माल्यमपनीय भूषणानि चोत्तारयति।)

विटः—अहो बलवांश्चायमन्धकारः। सम्प्रति हि,

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।
असत्पुरुषसेवेव दृष्टिर्निष्फलतां गता॥ १९॥

अपि च,

सुखमशरणमाश्रयो भयानां वनगहनं तिमिरं च तुल्यमेव।
उभयमपि हि रक्षतेऽन्धकारो जनयति यश्च भयानि यश्च भीतः॥२०

तथाहि—

आलोकविशाला मे सहसा तिमिरप्रवेशसञ्छन्ना ।
उन्मीलितापि दृष्टिर्निमीलितेवान्धकारेण ॥ २१ ॥

गणिका—अम्महे भित्तिपरिणाममूइदं पक्खदुवारं । अमम्मोअमलिणदाए इह अहिअं अन्धआरो । ता इह एव्व चिट्ठिस्सं । (स्थिता ।) [अहो भित्तिपरिणाममूचितं पक्षद्वारम् । अमम्मोगमलिनतयेहाधिकमन्धकारः । तद् इहैव स्थास्यामि ।]

नायकः—मैत्रेय ! गच्छ, चतुष्पथे बलिमुपहर मातृभ्यः ।

विदूषकः—ण मे सद्धा, अण्णो गच्छदु । [न मे श्रद्धा, अन्यो गच्छतु ।]

नायकः—किमर्थम् ।

विदूषकः—मम बुद्धी आदंसमण्डलगआ विअ छाआ वामेसु दक्खिणा दक्खिणेसु वामा होइ । [मम बुद्धिरादर्शमण्डलगतेव च्छाया वामेषु दक्षिणा दक्षिणेषु वामा भवति ।]

नायकः—मूर्ख ! यथाविभवेनार्च्यताम् । भक्त्या तुष्यन्ति दैवतानि । तद् गम्यताम् ।

विदूषकः—एआई अहं कहं गमिस्सं । [एकाक्यहं कथं गमिष्यामि ।]

नायकः—रदनिके ! अनुगच्छात्रभवन्तम् ।

रदनिका—जं भट्टा आणवेदि । [यद् भर्ताज्ञापयति ।]

विदूषकः—भोदि ! दीवं अहं णइस्सं । [भवति ! दीपमहं नेष्यामि ।]

नायकः—यथा भवान् मन्यते तथास्तु ।

विदूषकः—(दीपं गृहीत्वा) भो रदणिए ! अवावुद पक्खदुवारं । [भो रदनिके ! अपावृणु पक्षद्वारम् ।]

रदनिका—तह । (नाट्येन द्वारमपावृणोति) [तथा ।]

(गणिका दशान्तेन दीपं निर्वापयति।)

विदूषकः–अविदा ! अविदा ! । [अविदा ! अविदा ! ।]

चारुद.–वयस्य ! किमेतत्।

विदूषकः–अधावुदपक्खदुवारपिण्डीविट्टपविट्ठेण राअमग्गमाक्कि-ण्णेण वादेण सहसा णिग्गच्छन्तस्स मम हत्थे णिव्वाविदो दीवो। [अपावृतपक्षद्वारपिण्डीविघट्टितप्रविष्टेन राजमार्गसङ्कीर्णेन वातेन सहसा निर्गच्छतो मम हस्ते निर्वापितो दीपः।]

चारुद.–सूर्य ! धिक् त्वाम्।

विदूषकः–अण्णं णु मे अवरद्धं। रदणिए ! गच्छ, चउप्पहे मं पडि-वालेहि। जाव अहं वि अब्भन्तरचउस्सालादो दीवं पज्जलिअ आअच्छामि। (निष्क्रान्तः।) [अन्यत् खलु मेऽपराद्धम्। रदनिके ! गच्छ, चतुष्पथे मां प्रतिपालय। यावदहमप्यभ्यन्तरचतुःशालाद् दीपं प्रज्वाल्यागच्छामि।]

चेटी–अज्ज ! तह। (परिक्रामति।) [आर्य ! तथा।]

गणिका–दिट्ठिआ मम पवेसणिमित्तं अवावुदं पक्खदुवाअं। अलं चारित्तभएण। जाव पविसामि। (अभ्यन्तरं प्रविश्य तिष्ठति।) [दिष्ट्या मम प्रवेशनिमित्तमपावृतं पक्षद्वारम्। अलं चारित्रभयेन। यावत् प्रविशामि।]

विटः–(निःश्वासमुन्नमय्य) भवनाद्विनिर्गत्य काचिदियमागच्छति। भवतु, अनया वराकं वञ्चयामि। (प्रकाशम्) सुरभिस्नानधूपानु-विद्ध इव गन्धः।

शकारः–आम भावे ! शुणामि गन्धं दायणेहिं। अन्धआलपूलि-देहिं णाशापुडेहिं शुट्टु ण पेक्खामि। [आम भाव ! शृणोमि गन्धं श्रवणाभ्याम्। अन्धकारपूरिताभ्यां नासापुटाभ्यां सुष्ठु न पश्यामि।]

विट.–तिष्ठ तिष्ठ। क यास्यसि। (चेटीं गृह्णाति।)

(चेटी गमय मूर्धा पतिता ।)

४८ शकारः–गण्ह भावे ! गण्ह । [गृहाण भाव ! गृहाण ।]

विटः–

एषा हि वयसो दर्पात् कुलपुत्रावमानिनी ।
केशेषु कुसुमन्यासैः सेवितव्येषु धर्षिता ॥ २२ ॥

शकारः–भावे ! किं गहीदा । [भाव ! किं गृहीता ।]

विटः–अथ किम् । एषा गन्धानुसारेण गृहीता ।

३ शकारः–दाशीए पुत्तीए शीशं दाव छिन्दिअ पश्चा माळइश्शं । [दास्याःपुत्र्याः शीर्षं तावच्छित्वा पश्चान्मारयिष्यामि ।]

विटः–गृह्यतां तावत् ।

६ शकारः–(चेटीं गृहीत्वा)

एशा हि वाशू शिळशि ग्गहीदा केशेशु वाळेशु शिळोलुहेशु ।
कूजाहि कन्दाहि ळवाहि वात्तं महेश्शळं शङ्कळमिश्शळं वा ॥२
[एषा हि वासू शिरसि गृहीता केशेषु वालेषु शिरोरुहेषु ।
कूज क्रन्द लप वार्तं महेश्वरं शङ्करमीश्वरं वा ॥ २३ ॥]

(चेटीं बलादाकर्षति ।)

चेटी–किं अय्यमिस्सेहिं ववसिदं । [किमार्यमिश्रैर्व्यवसितम् ।]

३ शकारः–भावे ! जाणामि शळयोगेण ण होइ वशन्तशेणिआ ॥ [भाव ! जानामि स्वरयोगेन न भवति वसन्तसेना ।]

विटः–न मोक्तव्या । वसन्तसेनैवैषा ।

एषा रङ्गप्रवेशेन कलानां चैव शिक्षया ।
स्वरान्तरेण दक्षा हि व्याहर्तुं जन मुच्यताम् ॥ २ ॥

(प्रविश्य)

विदूषक.–(दीपं गृहीत्वा) राअमग्गसङ्किण्णेण सीअसुउमारेण वादेण पदे पदे विक्खोहिअमाणजाणिअतरङ्गतेल्लपुण्णभाअणं दीवं

कदं पि रच्छिअ गन्धिद्भ आअदो म्हि । [राजमार्गमध्यगेन शीत-सुकुमारेण वातेन पदे पदे विक्षोभ्यमाणप्रतिनतस्नेहपूर्णभाजनं दीप-मयमपि रक्षित्वा गृहीत्वागतोऽस्मि ।]

चेटी–(शकारं पादेन ताडयन्तीं दृष्ट्वा) अज्ज ! मेत्तेअ ! अयं परिभवो आदु अवठेवो । [आर्य ! मैत्रेय ! अयं परिभवोऽथवा-क्षेपः ।]

विदूषक –मा दाव, मा दाव । (सगद्गद विटं शकारं च दृष्ट्वा दक्षिण-स्थिद्वति ।) [मा तावद्, मा तावत् ।]

विटः–अये आर्यचारुदत्तस्य वयस्यो मैत्रेयः खल्वयम् । नेयमपि वसन्तसेना । महाब्राह्मण ! अन्यशङ्कया खल्विदमस्माभिरनुष्ठितं, न दर्पात् । पश्यतु भवान्,

अकामा ह्रियतेऽस्माभिः काचित् स्वाधीनयौवना ।
सा भ्रष्टा शङ्कया तस्याः प्राप्तेयं शीलवञ्चना ॥ २५ ॥

शकारः–अविदा दलिद्दशत्थवाहपुत्तश्श चालुदत्तवडुअश्श चेडी क्खु इअं, ण होइ वशन्तशेणिआ । शाहु, वशन्तशेणिए ! शाहु ! अन्धआले वलिअ अन्तलिदा वञ्चिदे भावे, अहके दाव वञ्चिदे कूडकावडशीलए । शव्वधा दुक्कले कडे । [अविदा दरिद्रसार्थवाह-पुत्रस्य चारुदत्तबटुकस्य चेटी खल्वियं, न भवति वसन्तसेना । साधु वसन्तसेने ! साधु । अन्धकारे कृष्णान्तरा वञ्चितो भावः । अहं तावद् वञ्चितः कूटकपटशीलया । सर्वथा दुष्करं कृतम् ।]

विदूषक.–मा दाव । ण जुत्तमिदं । [मा तावत् । न युक्तमिदम् ।]

विटः–भो महाब्राह्मण ! अयमनुनयसर्वस्वमञ्जलिः ।

विदूषकः–भोदु, भोदु । अणवरद्धो भवं । अणुणीदो भद्द एत्थ गत्थ अवरद्धो । [भवतु, भवतु । अनपराद्धो भवान् । अनुनीतोऽस्मे-बाअपराद्धः ।]

(चेटी [illegible])

१८ शकार:–गण्ह भावे ! गण्ह । [गृहाण भाव ! गृहाण ।]

विट:–

एषा हि वयसो दर्पात् कुलपुत्रानुसारिणी ।
केशेषु कुसुमाढ्येषु सेवितव्येषु कर्षिता ॥ ३८ ॥

शकार:–भावे ! किं गहीदा । [भाव ! किं गृहीता ।]

विट:–अथ किम् । एषा गन्धानुसारेण गृहीता ।

१ शकार:–दाशीए पुत्तीए शीशं दाव छिन्दिअ पश्चा मालइश्शं ।
[दास्याःपुत्र्याः शीर्षं तावच्छित्त्वा पश्चान्मारयिष्यामि ।]

विट:–पृच्छतां तावत् ।

६ शकार:–(चेटीं गृहीत्वा)

एशा हि वाशू शिलशि ग्गहीदा केशेशु वालेशु शिलोलुहेशु ।
कूजाहि कन्दाहि लवाहि वालं महेश्शलं शङ्कलमिश्शलं वा ॥३९
[एषा हि वासूः शिरसि गृहीता केशेषु बालेषु शिरोरुहेषु ।
कूज क्रन्द लप बालं महेश्वरं शङ्करमीश्वरं वा ॥ ३९ ॥]

(चेटीं बलादाकर्षति ।)

चेटी–किं अय्यमिस्सेहिं ववसिदं । [किमार्यमिश्रैर्व्यवसितम् ।]

३ शकार:–भावे ! जाणामि शलयोगेण ण होइ वशन्तशेणिआ ॥
[भाव ! जानामि स्वरयोगेन न भवति वसन्तसेना ।]

विट:–न मोक्तव्या । वसन्तसेनैषा ।

एषा रङ्गप्रवेशेन कलानां चैव शिक्षया ।
स्वरान्तरेण दक्षा हि व्याहर्तुं तत्र मुच्यताम् । ४०

(प्रविश्य)

विदूषक:–(दीपं गृहीत्वा) राअमग्गसङ्किण्णेण सीअसुउमारेण

३ वादेण पदे पदे विक्खोहिअमाणजणिअतरङ्गतेल्लपुण्णभाअणं दीवं

कहं वि रविग्गअ गणिहुअ आअदो म्हि । [शकारसाम्बन्धेन शीत-सुकुमारेण वातेन पदे पदे निर्वाप्यमाणमिमं तैलपूर्णभाजनं कथमपि रक्षित्वा गृहमागतोऽस्मि ।]

चेटी–(शकारं पादेन ताडयित्वा मदीया ।) अय्य ! मित्तेअ ! अअं परिभवो आदु अवरेद्धो । [आर्य ! मैत्रेय ! अयं परिभवोऽथवा-वलेप ।]

विदूषकः–मा दाव, मा दाव । (सगद्गदं विट शकार न स्पृश साहुत स्मिदति ।) [मा तावत्, मा तावत् ।]

विटः–अये आर्यचारुदत्तस्य वयस्यो मैत्रेयः खल्वयम् । नेयमपि वसन्तसेना । महाब्राह्मण ! अन्यशङ्कया खल्विदमस्माभिरनुष्ठितं, न दर्पात् । पश्यतु भवान्,

अकामा ह्रियतेऽस्माभिः काचित् स्वाधीनयौवना ।
सा भ्रष्टा शङ्कया तस्याः प्राप्तेयं शीलवञ्चना ॥ २५ ॥

शकारः–अविहा दलिद्दशत्थवाहपुत्तदश चालुदत्तवडुअदश चेडी खु इअं, ण होद वशन्तशेणिआ । शाहु, वशन्तशेणिए ! शाहु ! अन्धआले वञ्चिअ अन्तला वञ्चिदे भावे, अहके दाव वञ्चिदे कुक्कुलावदशीलिए । शीवढा दुक्कलं कडे । [अविहा दरिद्रसार्थवाह-पुत्रस्य चारुदत्तबटुकस्य चेटी खल्वियं, न भवति वसन्तसेना । साधु वसन्तसेने ! साधु ! अन्धकारं कृत्वान्तरा वञ्चितो भाव । अहं तावत् वञ्चितः कुक्कुरवर्तिन्या । सर्वथा दुष्करं कृतम् ।]

विदूषकः–मा दाव । ण जुत्तमिदं । [मा तावत् । न युक्तमिदम् ।]

विटः–भो महाब्राह्मण ! अयमनुनयसर्वस्वमञ्जलिः ।

विदूषकः–भोदु, भोदु । अणवरद्धो भवं । अणुणीदो भट्ट एव्व एत्थ अवरद्धो । [भवतु, भवतु । अनपराद्धो भवान् । अनुनीतोऽहमे-वात्रापराद्धः ।]

शकारः–भावे ! दिट्ठं नु भाआशि तं दलिद्दशत्थवाहपुत्तं चालुदत्तवडुअं। [भाव ! दृष्टं ननु बिभेषि तं दरिद्रसार्थवाहपुत्रं चारुदत्तबटुकम्।]

विटः–सत्यं भीतोऽस्मि।

शकारः–किस्स भावे ! किस्स। [कस्माद् भाव ! कस्मात्।]

विटः–तस्य गुणेभ्यः। पश्यतु भवान्,

स मद्विधानां प्रणयैः कृशीकृतो
न तस्य कश्चिद् विभवैरमण्डितः।
निदाघसंशुष्क इव ह्रदो महान्
नृणां तु तृष्णामपनीय शुष्यति ॥ २६ ॥

महाब्राह्मण ! अयमर्थः सार्थवाहपुत्रस्य न कथयितव्यः।

(निष्क्रान्तो विटः।)

शकारः–माळिश ! वडुअ ! माळिश ! भणेहि तं दळिद्दशत्थवाहपुत्तं चालुदत्तवडुअं मम वअणेण–लाअशाळे शण्ठाणे शवट्टेण शीशेण अणुवन्ध भणादि–णाडअइत्तिआ वशन्तशेणिआ णाम गणिआदारिआ शुवण्णवण्णा दुवेहि अम्मेहि बळक्कारेण णीअमाणा महन्तेण शुवण्णाळङ्कारेण तव गेहं पविट्ठा। शा शुवे णिय्याअइदव्वा। मा दाव तव अ मम अ दालुणो ख्योहो होदि त्ति। वडुअ! माळिश ! इदं च भणाहि–मा दाशीएपुत्त ! वारावदगळप्पविट्ठं विअ मूळकन्दं शीशकवाळं मडमडाइदशं। मा नु कवाडशम्पुडप्पविट्ठं विअ पक्ककवित्थं शीशं दे चुण्णाचुण्णं मडमडाइदशं ति। [मारिष ! बटुक ! मारिष ! भण त दरिद्रसार्थवाहपुत्रं चारुदत्तबटुकं मम वचनेन–राजश्यालः संस्थानकः सपटेन शीर्षेणानुबन्ध भणति–नाटकस्त्री वसन्तसेना नाम गणिकादारिका सुवर्णवर्णा द्वाभ्यामावाभ्यां बलात्कारेण नीयमाना महता सुवर्णालङ्कारेण तव गेहं प्रविष्टा। सा

श्री निर्वासितमस्या । मा तावत् तव च मम च दारुण क्रोधो भवतीति । बटुक ! मास्म ! इद च भण—मा दास्याः पुत्र ! परागतमाश्लिष्टमिव मुण्डकं शीर्षकपाल मदमदायिष्यामि । मा मन्तु वपारमस्युन्नविष्टमिव पत्रकपिश्य शीर्ष मे चूर्णचूर्ण मदमदायिष्यामि इति ।]

विदूषकः—भो ! तह । (इत्याग दीपनोद्वेजयति । [भो ! तथा ।]

शकारः—(सर्वतो विलोक्य) कहिं भावे । गदे भावे । अविहा भावे ! । [क भाव । गतो भावः । अविहा भाव ! ।]

(निष्क्रान्त शकारः ।)

विदूषकः—विदं देवकय्यं ति तत्तहोदो णिवेदइस्सामो । भोदि ! अपणीअदु दे हिअअमण्णु । अअं वुत्तन्तो अब्भन्तरं ण पेसिदव्वो । [इत्ने देवकार्यमिति तत्रभवतो निवेदयिष्यावः । भवति ! अपनीयतां ते हृदयमन्यु । अय वृत्तान्तोऽभ्यन्तरं न प्रेषयितव्य. ।]

चेटी—अय्य ! रदणिआ क्खु अहं । [आर्य ! रदनिका खल्वहम् ।]

विदूषकः—एहि गच्छामो । [एहि गच्छाव ।]

(उभौ परिक्रामत. ।)

नायकः—भद्रे ! कृत देवकार्यम् ।

गणिका—(आत्मगतम्) परिअणत्ति मं सद्दावेदि । भोदु, रक्खिदह्मि । [परिजन इति मां शब्दापयति । भवतु, रक्षितास्मि ।]

नायकः—मारुताभिलाषी प्रदोषः । तद् गृह्यतां प्रावारकम् ।

गणिका—(प्रावारक गृहीत्वा स्वगतम्) अणुदासीणं जोव्वणं से पडवासगन्धो सूएदि । [अनुदासीनं यौवनमस्य पटवासगन्धः सूचयति ।]

नायकः—रदनिके ! प्रवेशयाभ्यन्तरचतुःशालम् ।

गणिका—(आत्मगतम्) अभाइणी अहं अब्भन्तरप्पवेसस्स । [अभागिन्यहमभ्यन्तरप्रवेशस्य ।]

नायकः—किमिदानीं न प्रविशामि ।

गणिका—इदाणिं अहं किं भणिस्सं । [इदानीमहं किं भणिष्यामि ।]

नायकः—रदनिके ! किं विलम्बसे ।

(रदनिकाविदूषकावुपसृत्य)

चेटी—भट्टिदारअ ! इअ म्हि । [भर्तृदारक ! इयमस्मि ।]

नायकः—इयमिदानीं का ।

अविज्ञानप्रयुक्तेन धर्षिता मम वाससा ।
संवृता शरदभ्रेण चन्द्रलेखेव शोभते ॥ २७ ॥

गणिका—(आत्मगतम्) दीवाळोअसूइदरूवो सो एव्व दाणि एसो, जस्स किदे अहं णिस्सासमत्तळक्खिदं सरीरं उव्वहामि । दीपालोकसूचितरूपः स एवेदानीमेषः, यस्य कृतेऽहं निःश्वासमात्ररक्षितं शरीरमुद्वहामि ।]

विदूषक.—भो चारुदत्त ! राअसाळो सण्ठाणो सवट्टेण सीसेण अणुवन्दिअ विण्णवेदि—णाडअइत्तिआ वसन्तसेणिआ णाम गणिआदारिआ अम्हेहिं बळक्कारेण णीअमाणा महन्तेण सुवण्णाळङ्कारेण तुम्हाणं गेहं पविट्ठा । सा सुवे णिय्यादइदव्वत्ति । [भोः चारुदत्त ! राजश्यालः संस्थानः सपट्टेन शीर्षेणानुवन्द्य विज्ञापयति—नाटकस्त्री वसन्तसेना नाम गणिकादारिकास्माभिर्बलात्कारेण नीयमाना महता सुवर्णालङ्कारेण युष्माकं गेहं प्रविष्टा । सा श्वो निर्यातयितव्येति ।]

गणिका—हं बळक्कारेण णीअमाणत्ति णं भणादि । भोदु, अअं पत्तकाळो । (प्रकाशम्) अय्य ! सरणागदम्हि । [हं बलात्कारेण नीयमानेति ननु भणति । भवतु, अयं प्राप्तकालः । आर्य ! शरणागतास्मि ।]

नायकः—न भेतव्यं न भेतव्यम् । किं वसन्तसेनैषा ।

विदूषकः—अविहा वसन्तसेणा । (अपवार्य) भो चारुदत्त ! वसन्तसेणा खु इअं, जा भवदा कामदेवाणुआणप्पहुदि णअण-

मत्तसंथुदा सण्णिहिदमणोभवेण हिअएण उव्वहीअदि । ता पेक्खदु इअं । [अविदा वसन्तसेना । भो चारुदत्त ! वसन्तसेना सस्निग्धं, या भवता कामदेवायतनोद्यानप्रभृति नयनमात्रसंस्तुता संनिहितमनोभवेन हृदयेनोह्यते । तत् पश्यत्विमाम् ।]

नायकः—वयस्य ! पश्याम्येनां,

यत्र मे पतित काम क्षीणे विभवसञ्चये ।
रोषः कुपुरुषस्येव स्वगात्रेष्वेवावसीदति ॥ २८ ॥

गणिका—अदिण्णभूमिप्पवेसपधरिसणेण अवरद्धा अहं अय्यं सीसेण पसादेमि । [अदत्तभूमिप्रवेशप्रधर्षणेनापराद्धाहमार्यं शीर्षेण प्रसादयामि ।]

नायकः—यद्येवमहमपि तावदविज्ञानप्रवृत्तेन प्रेष्यसमुदाचारेण सापराधो भवतीं प्रसादयामि ।

विदूषकः—भो ! विपदन्ता इव सअहिअ दुव्विणीदवलीवद्दा अण्णोण्णं सद्धिं कलेसन्ति । अहं दाणिं कं पसादेमि । भोदु, दाणिं रदणिअं पसादेमि । रदणिए ! पसीददु, पसीददु होदी । [भो ! विषदन्ताविव शालिको दुर्विनीतबलीवर्दावन्योन्यं क्लेशयथ । अहमिदानीं कं प्रसादयामि । भवतु, इदानीं रदनिकां प्रसादयामि । रदनिके ! प्रसीदतु, प्रसीदतु भवती ।]

नायकः—भवति ! पर्याप्तमिम । किमनुतिष्ठसि क्लेशं ।

गणिका—(आत्मगतम्) महुरं क्खु इमिणा उत्तं । अदक्खिणं क्खु पढमदंसणे अहिअआगदाए इह वसिदुं । ता एवं करिस्सं । (प्रकाशम्) जइ मे अय्यो पसण्णो, अअं मे अलङ्कारो इह एव्व चिट्ठदु । अलङ्कारणिमित्तं पावा मे अणुसरन्ति । अहं पि अय्येण रक्खिदा गेहं गन्तुमिच्छामि । [मधुरं खल्वनेनोक्तम् । अदक्षिणं खलु प्रथमदर्शने अत्यागतयैव वस्तुम् । तदेवं करिष्यामि । यदि मे आर्यः प्रसन्नः, अयं मेऽलङ्कार इहैव तिष्ठतु । अलङ्कारनिमित्तं पापा मामनुसरन्ति । अहमप्यार्येण रक्षिता गेहं गन्तुमिच्छामि ।]

नायकः—अन्यर्थमुपदिशसि । मैत्रेय ! गृह्यताम् ।

विदूषकः—ण मे सद्धा । [न मे श्रद्धा ।]

नायकः—मूर्ख ! गृह्यताम् ।

विदूषकः—जं भवं आणवेदि । आणेदु भोदी । [यद् भवानाज्ञापयति । आनयतु भवती ।]

(गणिका विमुच्यालङ्कारं प्रयच्छति ।)

विदूषकः—(गृहीत्वा) रदणिए ! गण्ह एदं सुवण्णालङ्कारं तुवं । सट्ठीए सत्तमीए अ धारेहि । अहं अट्ठमीए अणद्धाए धारइस्सं । [रदनिके ! गृहाणैतं सुवर्णालङ्कारं त्वम् । षष्ठ्यां सप्तम्यां च धारय । अहमष्टम्यामनध्याये धारयिष्यामि ।]

चेटी—(विहस्य) सत्थं वक्खाणअन्तस्स भट्टिपुत्तस्स तदाणिं अवसरो होदि । आणेदु अय्यो । (गृहीत्वा निष्क्रान्ता ।) [शास्त्रं व्याचक्षाणस्य भर्तृपुत्रस्य तदानीमवसरो भवति । आनयत्वार्यः ।]

नायकः—कोऽत्र भोः ! । दीपिका तावत् ।

विदूषकः—भोः ! दीविआ गणिका विअ णिस्सिणेहा संवुत्ता । [भोः ! दीपिका गणिकेव निःस्नेहा संवृत्ता ।]

नायकः—कृतं दीपिकया । (विलोक्य) उदितो भगवान् सर्वजनसामान्यप्रदीपश्चन्द्रः । अतः खलु,

उदयति हि शशाङ्कः क्लिन्नखर्जूरपाण्डु-
युवतिजनसहायो राजमार्गप्रदीपः ।
तिमिरनिचयमध्ये रश्मयो यस्य गौरा
हृतजल इव पङ्के क्षीरधाराः पतन्ति ॥ २९ ॥

भवति ! राजमार्गे निष्क्रमणः क्रियताम् । सखे ! अनुगच्छात्र भवतीम् ।

विदूषकः—जं भव आणवेदि । एदु एदु भोदी । [यद् भवानाज्ञापयति । एत्वेतु भवती ।] (निष्क्रान्ताः सर्वे ।)

प्रथमोऽङ्कः ।

अथ द्वितीयोऽङ्कः ।

(ततः प्रविशति गणिका चेटी च ।)

गणिका–तदो तदो । [ततस्ततः ।]

चेटी–अय्यए ण किंचि मए भणिदं । किं तदो तदो त्ति । [अय्यके न किञ्चिन्मया भणितम् । किं ततस्तत इति ।]

गणिका–हञ्जे ! किं मए मन्तिदं । [हञ्जे ! किं मया मन्त्रितम् ।]

चेटी–अय्युए ! सिणेहो पुच्छदि, ण पुरोभाइदा[1] । किं चिन्तीअदि । [अय्युके ! स्नेहः पृच्छति, न पुरोभागिता । किं चिन्त्यते ।]

गणिका–हञ्जे ! तुमं दाव किं त्ति तक्केसि । [हञ्जे ! त्वं तावत् किमिति तर्कयसि ।]

चेटी–अप्पओअणदाए गणिआभावस्स अय्युआ कं पि कामेदि त्ति तक्केमि । [अप्रयोजनतया गणिकाभावस्यार्युका कमपि कामयत इति तर्कयामि ।]

गणिका–सुट्ठु तुए किदं । अवच्छिण्णा दे दिट्ठी । ईदिसवण्णप्पिएव । [सुष्ठु त्वया कृतम् । अवच्छिन्ना ते दृष्टिः । ईदृशवर्णैव ।]

चेटी–अणग्घिदं पि अय्युअं भणिदं पिअ पेक्खामि । कामो हि भअवं अणवेक्खीदो उस्सुअं तस्सजणस्स । [अनलङ्कृतामप्यार्युकां भणितामिव पश्यामि । कामो हि भगवाननपेक्षित उत्सुकस्तस्यजनस्य ।]

गणिका–हदासे ! उक्कण्ठिदव्वे का दे रदी । [हताशे ! उत्कण्ठितव्ये का ते रतिः ।]

चेटी–अय्युए ! इच्छामि पुच्छिदुं बहुमाणो विअ रमणीओ कोविअ राअकुमारो । [अय्युके ! इच्छामि प्रष्टुं बहुमान इव रमणीयः कोऽपि राजकुमारः ।]

---

१. पुरोभाइदाए.

भवति। दत्वा न विकत्थते। अल्पमपि स्मरति, बहुकमप्यपकृतं विस्मरति। अज्जुके ! किं बहुना, तस्य कुलपुत्रस्य गुणानां चतुर्भागमपि सुदीर्घेणापि ग्रीष्मदिवसेन वर्णयितुं न शक्यम्। किं बहुना, दक्षिणतया परकीयमिवात्मनः शरीरं धारयति।]

गणिका–(अपवार्य)हञ्जे ! कोणु क्खु सो अय्यचारुदत्तस्स गुणाणं अणुकरेदि। [हञ्जे ! कोनु खलु स आर्यचारुदत्तस्य गुणानामनुकरोति।]

चेटी–मम वि कोदूहळं सोदुं। कोणुक्खु उज्जआणिं अत्तणो गुणेहि मण्डेदि। [ममापि कौतूहलं श्रोतुम्। कोनुखलूज्जयनीमात्मनो गुणै मंण्डयति।]

गणिका–तदो तदो। [ततस्ततः।]

संवाहकः–तदो तस्स गुणविक्किणिदसरीरो विस्मरिदकळसो उवजीविओ संवुत्तो। [ततस्तस्य गुणविक्रीतशरीरो विस्मृतकलत्र उपजीवी संवृत्तः।]

गणिका–किं सो दरिद्दो। [किं स दरिद्रः।]

संवाहकः–कहं अणाचिक्खिदे अय्या जाणादि। [कथमनाख्याते आर्या जानाति।]

गणिका–णअरिम दुल्लहो गुणविभवो त्ति। तदो तदो। [एकस्मिन् दुर्लभो गुणविभव इति। ततस्ततः।]

चेटी–को णाम सो अय्यो। [को नाम स आर्यः।]

संवाहकः–अय्यचारुदत्तो णाम। [आर्यचारुदत्तो नाम।]

गणिका–सुणादु। तदो तदो। [सुणातु। ततस्ततः।]

संवाहकः–तदो सो विभवमन्ददाए असमत्थिदपरिजणो विसालिअ चदुक्कसमाणां पडिसमारम्भो गाधपाठकुले पविसामि। अहं वि तेण अय्येण अदमणुस्सारो—अणो जुत्तिदुरं ति। वह

अण्णं गरिमं मणुस्सरअणं क्खेअं ति, वद च तस्स कोमळक्ख-
लिदमहुरसरीरपरिसप्पिदत्थं मे इत्थं साहारणसरीरसम्मदेण सो-
१५२ वण्णीअं करिस्से ति जादणिव्वेदो दढसरीररक्खणत्थं जूदोवजीवी
संवुत्तो । [तत्र स विभवमन्दतयास्वाधीनशरीरस्तां विमर्जितकुटुम्ब-
भरणभारिग्रमाग्रावर्तेयः सार्थवाहकुले प्रतिवसति । अहमपि तेनार्येणा-
१५६ ऽस्मनुजातोऽभ्यनुपविष्टनामिति । कथमस्मदीयः मनुष्यरत्नं लभेयेति,
वदं च तस्य कोमलकलितमधुरशरीरस्पर्शनार्थं मे इत्थं साधारणशरीर-
समर्दनं शोचनीय करिष्यामीति जातनिर्वेदो दृढशरीररक्षणार्थं द्यूतो-
१५७ पजीवी संवृत्त ।]

(गणिका सदयमात्म चेटीमवलोकयति ।)

चेटी—तदो तदो । [ततस्ततः ।]

१६६ संवाहक—तदो बहूणि दिणाणि मए पराहवेण पुरुसेण कदाइ अहं
पि इदस्स गुवण्णेसु पराइदो म्हि । [ततो बहूनि दिनानि मया
पराजितेन पुरुषेण कदाचिदहमपि दशसु सुवर्णेषु पराजितोऽस्मि ।]

१६७ गणिका—तदो तदो । [ततस्ततः ।]

संवाहक—तदो अज्ज धेममगो अहन्दोवगदो समासादिदो म्हि ।
तस्स भएण इह पविट्ठो । एव अय्या जाणादु । [ततोऽद्य
१६९ वेतनार्थं पदग्दोषनम समासादितोऽस्मि । तस्य भयेनेह प्रविष्टः ।
एवमार्या जानातु ।]

गणिका—(आत्मगतम्) अहो अच्चाहिदं । एवं खु मणो वासपाद-
१७१ पविणामेण पक्किरणो आहिण्डन्ति त्ति । (प्रकाशम्) एवं गदे
अत्तकेरओ अय्यो । इञ्जा ! णहि सं जण विसज्जेहि । [अहो
अत्याहितम् । एवं खलु सत्ये वामपादप्रविणामेन पक्षिण आहिण्डन्त
१७४ इति । एवं गत आत्मीय आर्यः । हञ्जे ! णहि तं जनं विसर्जय ।]

चेटी—तह । (निष्क्रान्ता ।) [तथा ।]

गणिका–ण णु अय्येण अप्पणिविसिणा विन्णा कादव्वा। अय्यस्स-
१७७दुणो एव णेदि त्ति अय्यो आणादु। [न नन्वार्येणात्मनिर्विण्णेन कर्तव्या। आर्यस्यैव पुनः स्वस्वामिनः पुराणीभावो ज्ञायताम्।]

(प्रविश्य) चेटी–अय्युए! विसज्जिदो सो जणो, परितुट्ठो गदो
१८०अ। [आर्ये! विसर्जितः स जनः, परितुष्टो गतश्च।]

संवाहक–अणुग्गहिदो म्हि। [अनुगृहीतोऽस्मि।]

गणिका–गच्छदु अय्यो सुहिजणदंसणेण पीदिं णिव्वत्तेदुं।
१८३[गच्छत्वार्यः सुहृज्जनदर्शनेन प्रीतिं निर्वर्तयितुम्।]

संवाहक–अज्ज एव कदाइ णिव्वेदेण पव्वजेअं। जइ इअं परिअणे मह्हुन्ता कला मये, तदो अय्याए अणुग्गहिदो भवेअं। [अद्यैव
१८६कदाचिन्निर्वेदेन प्रव्रजेयम्। यदीयं परिजने मदुक्ताकला भवेत्, तत आर्ययानुगृहीतो भवेयम्।]

गणिका–जस्स किदे इअं कला सिक्खिदा, सो एव्व अय्येण
१८९उवचिट्ठिदव्वो भविस्सदि। [यस्य कृते इयं कला शिक्षिता, स एवार्येणोपस्थातव्यो भविष्यति।]

संवाहक–(स्वगतम्) णिउणं खु पच्चाचक्खिदो म्हि। को दि णाम
१९२अप्पणा किदं पच्चुअआरेण विणासेदि। (प्रकाशम्) अय्ये! गच्छामि दाव अहं। [निपुणं खलु प्रत्याख्यातोऽस्मि। को हि नामात्मना कृतं प्रत्युपकारेण विनाशयति। आर्ये! गच्छामि तावदहम्।]

१९५गणिका–गच्छदु अय्यो पुणो दंसणाअ। [गच्छत्वार्यः पुनर्दर्शनाय।]

संवाहकः–अय्ये! तह। (निष्क्रान्तः।) [आर्ये! तथा।]

१९८गणिका–हं, सद्दो विअ। [हं शब्द इव।]

(प्रविश्य)

चेटः–विच्छित्तिए! विच्छित्तिए! कहिं कहिं अज्जुआ। [विच्छित्तिके! विच्छित्तिके! कुत्र कुत्राज्जुका।]
२०१

गणिका—हञ्जे! किं णेदं। [हञ्जे! किमेतत्।]

चेटः—हं, विप्पलद्धो म्हि, वादाअणणिक्कामिदपुव्वकाआए ओण-
२०५ रमिअपओहराए कण्णऊरअस्स परिप्फन्दो अज्जुआए जेण ण दिट्ठो।
[हं, विप्रलब्धोऽस्मि, वातायननिष्कामितपूर्वकायया अवनमितपयोधरया
कर्णपूरस्य परिस्पन्दोऽज्जुकया येन न दृष्टः।]

२०७ गणिका—लहुअजणस्स सुलहो विम्हओ। किं दे उस्सेअस्स कारणम्।
[लघुजनस्य सुलभो विस्मयः। किं ते उत्सेकस्य कारणम्।]

चेटः—सुणादु अज्जुआ—एसो उग्गवेगेण ओगाहणणिवत्तिदेण
२१० पहुसमदगन्धं राअमग्गं करन्तेण मअरन्दहत्थिणा भद्दकयोदएण अहि-
अणेअपुरुसहट्टकेसु राअमग्गेसु उवरिअपट्टविराअदाए अहि-
अलङ्करणीओ कोन्वि पव्वइदो समासादिदो। [श्रूयतामज्जुका-
२११ एष उग्रवेगेनावगाहननिवर्तितेन प्रघुणमदगन्धं राजमार्गं कुर्वता मक-
रन्दहस्तिना भद्रकयोगकेनानेकपुरुषसङ्कुलेषु राजमार्गेषूपरितपटविरागत-
याधिरलङ्करणीय कश्चित् प्रव्रजितः समासादितः।]

२१६ गणिका—हं, तदो तदो। [हं, ततस्ततः।]

चेटः—तदो मए हत्थिहत्थाभिताडिअमाणो दन्तन्तरपरिवत्तमाणो
हत्थिहत्थपडिदचरणो तदो हा हा विपादिदो हा हा हदो त्ति जणवादे
२१९ संवुत्ते तदो दिण्णकरप्पहारेण परिवत्तिदं हत्थिं करिअ मोइदो सो
परिव्वाजो। [ततो मया हस्तिहस्तामर्दनाड्यमानो दन्तान्तरपरिवर्त-
मानो हस्तिहस्तपतितचरणः ततो हा हा विपादितो हा हा हत इति
२२२ जनवादे संवृत्ते ततो दत्तकरप्रहारेण परिवर्तितं हस्तिनं कृत्वा मोचित-
स परिव्राट्।]

गणिका—पिअं मे। तदो तदो। [प्रियं मे। ततस्ततः।]

२२५ चेटः—तदो सव्वो जणो भणादि—अहो चेडस्स कम्म त्ति। ण
उण कोन्वि किं पि हत्थदट्टं दाउं। तदो अज्जुए! केण वि कुळपुत्तेण

उइदाणि आभरणट्ठाणाणि विलोइअ अङ्गुट्ठिआणिअं वि [illegible]
२२८ अजुट्ठं पेक्खिअ इदं उवाअभिअ हिअं णिम्मविअ एत्थओ मे
थिमदो णि वदिअ परिअणहत्थे अज्ज पावरओ पेसिदो। [[illegible]
[illegible] — [illegible] । न पुनः कश्चित् [illegible]
[illegible] । [illegible] ! [illegible]
[illegible] [illegible] [illegible]
[illegible] इति कृत्वा [illegible] ।]
[illegible] — [illegible] अज्जपादपदमस्स गुणाणं अणुरूवेहि। [[illegible]
[illegible] ।]

[illegible] — अज्जुए ! मम वि कोदूहलं अत्थि। कोदुअं [illegible]
[[illegible] ! [illegible] । [illegible] ।]
[illegible] — [illegible] । [[illegible]
[illegible] ।]
[illegible] — [illegible] । [[illegible] ।]
[illegible] — [illegible] । [[illegible] !
[illegible] ।]
[illegible] — अहं ! [illegible] णाम [illegible] आणादि। [अहं ! [illegible]
[illegible] ।]
[illegible] — ण हु जाणादि [न [illegible] ।]
[illegible] — [illegible] । [[illegible] ।]
[illegible] — अह [illegible], [illegible] । [[illegible], [illegible]
[illegible] ।]
[illegible] — [illegible] — [illegible] । [[illegible]
[illegible] — [illegible] ।]

·]

गणिका—एहि दाव णं पेक्खामो । [एहि तावत् तं पश्याम. ।]

चेट:—पेक्खदु पेक्खदु अज्जुआ । एसो गच्छइ । [पश्यतु पश्य-
त्वार्युका । एष गच्छति ।]

गणिका—(प्रासादात् विलोक्य) हञ्जे ! एसो हि सो अज्जचारुदत्तो
५८ तस्स अण्णोवयरीदसयपावरओ गच्छइ । ता जाव दूरं गओ ण
भविस्सदि एसो, पेक्खम्ह दाव णं । [हञ्जे ! एष हि स आर्यचारु-
दत्त एव यत्नोपगत्योमानसमावारको गच्छति । तद् यावद् दूरं गतो न
१५८ भविष्यत्येष, पश्यामस्तावदेनम् ।]

(निष्क्रान्ताः सर्वे ।)

द्वितीयोऽङ्कः ।

अथ तृतीयोऽङ्कः ।

(ततः प्रविशति नायको विदूषकश्च ।)

२ नायकः—वयस्य ! वीणा नामासमुद्रोत्थितं रत्नम् । कुतः,

उत्कण्ठितस्य हृदयानुगता सखीव
सङ्कीर्णदोषरहिता विषयेषु गोष्ठी ।
क्रीडारसेषु मदनव्यसनेषु कान्ता
स्त्रीणां तु कान्तरतिविघ्नकरी सपत्नी ॥ १ ॥

विदूषक.—भो वअस्स ! को कालो किदपरिघोसणदाण गिहसम्पादा
राअमग्गा । कुक्कुरा वि ओसुत्ता । वअं णिद्दं ण लभामो । अण्णं
३ च दाणि अब्भदरीअं । इमं हदवीणं ण रमामि । अहिअदिदत्थाणे
विच्छिण्णतन्तिआ होदु । [भो वयस्य ! कः कालः कृतपरिघोषण-
तया नि सम्पाता राजमार्गाः । कुक्कुरा अप्यवसुप्ताः । वयं निद्रां न
६ लभामहे । अन्यच्चेदानीमाभ्यन्तरम् । इमां हतवीणां न रमे । अधिकरण-
स्थाने विच्छिन्नतन्त्रीका भवतु ।]

नायकः—वयस्य ! भावशबलेन बहुशः खल्वेतन्मधुरं गीतम्। न च भवान् रमते।

विदूषकः—अहो एव्व एदं अहं ण रमामि। महुरं पि बहु खादिअं अजिण्णं होइ। [अहमेवैतदहं न रमे। मधुरमपि बहु खादितमजीर्णं भवति।]

नायकः—सर्वथा सुव्यक्तं गीतम्। कुतः,

रक्तं च तारमधुरं च समं स्फुटं च
भावार्पितं च न च साभिनयप्रयोगम्।
किं वा प्रशस्य विविधैर्बहु तत्तदुक्त्वा
भित्त्यन्तरं यदि भवेद् युवतीति विद्याम् ॥ २ ॥

विदूषकः—कामं पसंसेदु भवं। मम क्खु दाव गाअन्तो मणुस्सो इत्थिआ वि पठन्ती उभअं आदरं ण देदि। गाअन्तो दाव मणुस्सो रत्तसुमणावेट्ठिदो विअ पुरोहिदो दिढं ण सोहइ। इत्थिआ वि पठन्ती छिण्णणासिआ विअ धेणुआ अदिविरूआ होइ। [कामं प्रशंसतु भवान्। मम खलु तावद् गायन् मनुष्यः स्त्र्यपि पठन्त्युभयमादरं न ददाति। गायंस्तावन्मनुष्यो रक्तसुमनोवेष्टित इव पुरोहितो दृढं न शोभते। स्त्र्यपि पठन्ती छिन्ननासिकेव धेनुरतिविरूपा भवति।]

नायकः—सखे ! उपारूढोऽर्धरात्रः। स्थिरतिमिरा राजमार्गाः। निस्सम्पातपुरुषत्वात् प्रसुप्तेवोज्जयनी प्रतिभाति। कुतः,

असौ हि दत्त्वा तिमिरावकाशमस्तं गतो ह्रस्वपक्षचन्द्रः।
तोयावगाढस्य वनद्विपस्य विषाणकोटीव निमज्जमाना ॥ ३ ॥

विदूषकः—सुट्ठु भवं भणादि। अन्तद्धिअमाणचन्दलद्धावआसो ओदरदि विअ पासादादो अन्धआरो। [सुष्ठु भवान् भणति। अन्तर्धानचन्द्रलब्धावकाशोऽवतरतीव प्रासादादन्धकारः।]

नायकः—(परिक्रम्य) इदमस्मदीयं गृहम्। वर्धमानक! वर्धमानक!

विदूषकः—वड्ढमाणअ! वड्ढमाणअ! दुवारं अवावुद। [वर्धमानक! वर्धमानक! द्वारमपावृणु।]

(प्रविश्य)

चेटः—अम्मो अय्यमेत्तेओ। [अम्मो आर्यमैत्रेयः।]

नायकः—वर्धमानक!

चेटः—अम्मो भट्टिदारओ। भट्टिदारअ! वन्दामि। [अम्मो भर्तृदारकः। भर्तृदारक! वन्दे।]

नायकः—पादोदकमानय।

चेटः—(परिक्रम्य) इदं पादोदअं। (नायकस्य पादौ प्रक्षालयति।) [इदं पादोदकम्।]

विदूषकः—वड्ढमाणअ! मम वि पादं पक्खालेहि। [वर्धमानक! ममापि पादं प्रक्षालय।]

चेटः—सुद्धोदेसु पादेसु भूमीए पलोट्टिदव्व। उदअं विनासेहि। अहव आणेहि। पक्खालइस्सं। (नाट्येन विदूषकस्य पादौ प्रक्षालयति।) [सुधौतयोः पादयोर्भूम्यां प्रलोटितव्यम्। उदकं विनाशय। अथवानय। प्रक्षालयिष्यामि।]

विदूषकः—ण केवलं दासीए पुत्तेण पादा धोदा, मुहं वि धोदं। [न केवलं दास्याः पुत्रेण पादौ धौतौ, मुखमपि धौतम्।]

नायकः—वयस्य!

इयं हि निद्रा नयनावलम्बिनी ललाटदेशादुपसर्पतीव माम्।
अदृश्यमाना चपला जरेव या मनुष्यवीर्यं परिभूय वर्धते ॥४॥

मैत्रेय! सुप्यताम्।

(निष्क्रान्तश्चेटः।)

(प्रविश्याभरणसमुद्गहस्ता)

चेटी–अय्यमेत्तेअ ! उट्ठेहि उट्ठेहि । [आर्यमैत्रेय ! उत्तिष्ठोत्तिष्ठ ।]

विदूषकः–भोदि ! किं एदं । [भवति ! किमेतत् ।]

चेटी–इअं सुवण्णभण्डं सट्ठीए सत्तमीए परिवेट्टामि । अट्ठमी खु अज्ज । [इदं सुवर्णभाण्डं षष्ठ्यां सप्तम्यां परिवर्तयामि । अष्टमी खल्वद्य ।]

नायकः–इदं तद् वसन्तसेनायाः स्वकम् ।

चेटी–आम । भणादु भणादु भट्टिदारओ, गण्हदु त्ति । [आम । भणतु भणतु भर्तृदारकः गृह्णात्विति ।]

नायकः–मैत्रेय ! गृह्यताम् ।

विदूषकः–किं णिमित्तं अअं अळङ्कारो अब्भन्तरचउस्साळं ण प्पवेसीअदि । [किंनिमित्तमयमलङ्कारोऽभ्यन्तरचतुःशालं न प्रवेश्यते ।]

नायकः–मूर्ख ! बाह्यजनधारितमलङ्कारं गृहजनो न द्रक्ष्यति ।

विदूषकः–का गई । आणेहि गण्हामि चोरेहिं गण्हिअमाणं । [का गतिः । आनय गृह्णामि चोरैर्गृह्यमाणम् ।]

(चेटी दत्त्वा निष्क्रान्ता ।)

विदूषकः–भो ! किंणिमित्तं सो पावरओ तस्स गणिआपरिआरअस्स दिण्णो । [भोः ! किंनिमित्तं स प्रावारकस्तस्मै गणिकापरिचारकाय दत्तः ।]

नायकः–सानुक्रोशतया ।

विदूषकः–इह वि साणुक्कोसदा । [इहापि सानुक्रोशता ।]

नायकः–वयस्य ! मा मैवम् ।

विदूषकः–अहं भरिदगद्दभो विअ भूमीए पळोट्टामि । [अहं भरितगर्दभ इव भूम्यां प्रलुठामि ।]

नायकः.—निद्रा मां बाधते । तूष्णीं भव ।

विदूषकः—सअदु भवं सुहप्पबोहाअ । जाव अहं पि सुविस्सं ।
[शेतां भवान् सुखप्रबोधाय । यावदहमपि स्वप्स्यामि ।]

(इत्युभौ स्वपितः ।)

(ततः प्रविशति शर्विलकः ।)

शर्विलकः.—एष भोः ।

कृत्वा शरीरपरिणाहसुखप्रवेशं
शिक्षाबलेन च बलेन च कर्ममार्गम् ।
गच्छामि भूमिपरिसर्पणघृष्टपार्श्वो
निर्मुच्यमान इव जीर्णतनुर्भुजङ्गः ॥ ५ ॥

भोः ! वृक्षवाटिकापक्षद्वारे सन्धिं छित्वा प्रविष्टोऽस्मि । यावदिदानीं चतुःशालमुपसर्पामि । (सनिर्वेदं विचिन्त्य) भोः

कामं नीचमिदं वदन्तु विबुधाः सुप्तेषु यद्वर्तते
विश्वस्तेषु हि वञ्चनापरिभवः शौर्यं न कार्कश्यता ।
स्वाधीना वचनीयतापि तु वरं बद्धो न सेवाञ्जलि-
र्मार्गो ह्येष नरेन्द्रसौप्तिकवधे पूर्वं कृतो द्रौणिना ॥ ६ ॥

(विचिन्त्य)

लुब्धोऽर्थवान साधुजनावमानी वणिक् स्ववृत्तावतिकर्कशश्च ।
यस्तस्य गेहं यदि नाम लप्स्ये भवामि दुःखोपहतो न चित्ते ॥७॥

यद्वा तद्वा भवतु । किं वा न कारयति मन्मथः । यावदारभे कर्म । भोः !

देशः को नु जलावसेकशिथिलश्छेदादशब्दो भवेद्
भित्तीनां क्व नु दर्शितान्तरसुखः सन्धिः करालो भवेत् ।
क्षारक्षीणतया चरेष्टककृशं हर्म्यं क्व जीर्णं भवेत्
क्व स्त्रीजनदर्शनं च न भवेत् स्वन्तश्च यत्नो भवेत् ॥ ८ ॥

(परिक्रम्य) इयं पाण्डुरिमागभित्तिः। मोरसेदनया मृदविनि
इहायं भवनविन्यासः। इह तावत् प्रवेशावकाशं करिष्ये। भोः
कीदृश इदानीं सन्धिच्छेदः कर्तव्यः स्यात्।

सिंहाक्रान्तं पूर्णचन्द्रं झषास्यं चन्द्रार्धं वा व्यालवक्त्रं त्रिकोणम्।
सन्धिच्छेदः पीठिका वा गजास्यमस्मत्सख्या विस्मितानां कथं स्यु: ॥९॥

भवतु, सिंहाक्रान्तमेव च्छेदयिष्ये।

विदूषकः–भो ! आगमि नु भव, णहि। [भोः ! जानामि नु
भवान्, नहि।]

नायकः–किमर्थम्।

विदूषकः–अहं खु ताव कनअकरण्डिअसङ्केदो विअ मज्झिअम-
मणओ णिद्दं ण लभामि। वामं मे अक्खि फन्देदि। चोरे
सन्धिं छिन्दन्तं विअ पेक्खामि। जइ ईदिसी अवत्था आगता,
जादीए दलिद्दो एव्व होमि। [अहं खलु तावत् कनककरण्डिकासङ्केतेन
इव चाक्यश्रमणको निद्रां न लभे। वामं खलु मेऽक्षि स्पन्दते।
चोरः सन्धिं छिन्दन्तमिव पश्यामि। यदीदृश्यवस्थागता, जात्या दरिद्र
एव भवामि।]

नायकः–मूर्ख ! धिक् त्वाम्। दारिद्र्यमभिलषसि।

सज्जलकः–अथ केनेदानीं सन्धिच्छेदमार्गः सूचयितव्यः स्यात्।
नन्विदं दिवा ब्रह्मसूत्रं रात्रौ कर्मसूत्रं भविष्यति।

अद्यास्य भित्तिषु मया निशि पातितासु
छेदान् समासु सुदर्पितकाकलीषु।
काल्यं विषादविमुखः प्रतिवेशवर्गो
दोषांश्च मे वदतु कर्मसु कौशलं च ॥ १० ॥

नमः खरपटाय। नमो रात्रिगोचरेभ्यो देवेभ्यः। (तथा करोति।)

हन्त अवसितं कर्म। प्रविशामि तावत्। (प्रविश्य) अये! ज्वलति दीपः। अपसरामि तावत्। धिक्, ममान्ध्य रूपम्।

मार्जारः प्लवने वृकोऽपसरणे श्येनो गृहालोकने
निद्रा सुप्तमनुष्यवीर्यतुलने संसर्पणे पन्नगः।
माया वर्णशरीरभेदकरणे वाग् देशभाषान्तरे
दीपो रात्रिषु सङ्कटे च तिमिरं वायुः स्थले नौर्जले ॥ ११ ॥

(सर्वतो विलोक्य) आगन्तुकत्वादशिक्षितसन्धिविस्तरः केवलं भवनप्रत्ययादिह प्रविष्टोऽस्मि। न चेदानीं कश्चित् परिच्छदविशेषं पश्यामि। किन्नु खलु दरिद्र एवायम्। उताहो अयं संयमननिर्धनं द्रव्यं धारयति। अथवा, अभिजातोऽयं भवनविन्यासः। स्वभुजप्रनष्टविभवेनानेन भवितव्यम्।

तथा विभवमन्दोऽपि जन्मभूमिव्यपेक्षया।
गृहं विभवकालेऽपि नीलकण्ठेन रक्षति ॥ १२ ॥

भवतु पश्यामस्तावत्। अथवा, न खलु मे तुल्यावस्थः कुलपुत्रः पीडयितव्यः। गच्छामि तावत्।

विदूषकः—भो! गण्ह एदं सुवण्णभण्डअं। [भो! गृहाणैतत् सुवर्णभाण्डम्।]

शर्विलकः—कथं सुवर्णभाण्डमित्याह। किं मां दृष्ट्वाभिभाषते। आहोस्विन् नष्टप्रलापवान् स्वप्नायते। भवतु पश्यामस्तावत्। (दृष्ट्वा) भूतार्थं सुप्त एवायम्। तथाहि,

निःश्वासोऽस्य न शङ्कितो न विषमस्तुल्यान्तरं जायते
गात्रं सन्धिषु दीर्घतामुपगतं शय्याप्रमाणाधिकम्।
दृष्टिर्गाढनिमीलिता न चपलं पक्ष्मान्तरं जायते
दीपं चैव न मर्षयेदभिमुखः स्याल्लक्ष्यसुप्तो यदि ॥ १३ ॥

फलतु तत्। अये जर्जरप्रावरणैकदेशे दीपप्रभाभ्यन्तरीकृतरूपं दृश्यते। सुपरिगृहीतमनेन। अयमत्र प्राप्तकालः। इमे मया गृहीताः शलभाः। दीपनिर्वापणार्थमेकं मुञ्चामि। (भ्रमरकरण्डकादेकं मुञ्चति।) अये एष दीपं निर्वाप्य पतति।

विदूषकः-अविहा णिव्वाविदो दीवो दाणिं। मुसिदो म्हि। भो चारुदत्त! गण्ह एदं सुवण्णालङ्कारं। अहं खु सीदीए उवहदपवुत्तो विअ वणिओ णिद्दं ण लभामि। मम बम्हत्तणेण साविदो सि, जइ ण गण्हसि। [अविहा निर्वापितो दीप इदानीम्। मुषितोऽस्मि। भोश्चारुदत्त! गृहाणेमं सुवर्णालङ्कारम्। अहं खलु शीत्योपहतप्रवृत्त इव वणिग् निद्रां न लभे। मम ब्रह्मत्वेन शापितोऽसि, यदि न गृह्णासि।]

सज्जलकः-किमत्र शपथपरिग्रहेण। एष प्रतिगृह्णामि। (गृह्णाति।)

विदूषकः-(दत्त्वा) अहं विक्किणिदभण्डओ विअ वणिजओ सुहं सइस्सं। [अहं विक्रीतभाण्डक इव वणिक् सुखं शयिष्ये।]

सज्जलकः-सुखं स्वपिहि महाब्राह्मण! (विचिन्त्य) भोः! ब्राह्मणेन विश्वासाद् दीयमानं मया हर्तव्यमासीत्।

धिगस्तु खलु दारिद्र्यमनिर्वेदं च यौवनम्।
यदिदं दारुणं कर्म निन्दामि च करोमि च ॥ १४ ॥

(नेपथ्ये पटहशब्दः क्रियते।)

सज्जलकः-(कर्णं दत्त्वा) अये प्रभातसमयः संवृत्तः। अपसरामि तावत्।

(निष्क्रान्तः सज्जलकः।)

(प्रविश्य)

चेटी-(साक्रन्दम्) अय्यमेत्तेअ! अम्हाणं रुक्खवाडिआपक्खदुवाले सन्धिं छिन्दिअ चोरो पविट्ठो। [आर्यमैत्रेय! अस्माकं

वृक्षवाटिकापक्षद्वारे सन्धिं छित्वा चोरः प्रविष्टः ।]

विदूषकः—(सहसोत्थाय) किं भणादि होदी । [किं भणति भवती ।]

(चेटी रदणाद्धिआणि पठति ।)

विदूषकः—चोरं छिन्दिअ सन्धी पविट्टो । [चोरं छित्वा सन्धिः प्रविष्टः ।]

चेटी—हदास ! सन्धिं छिन्दिअ चोरो पविट्टो । [हताश ! सन्धिं छित्वा चोरः प्रविष्टः ।]

विदूषकः—आअच्छ णं दंसेहि । [आगच्छ ननु दर्शय ।]

चेटी—(परिक्रम्य) एदं । [एतत् ।]

विदूषकः—अविहा दासीएपुत्तेण कुक्कुरेण पवेसो किदो । भोदि ! आअच्छ, चारुदत्तस्स पिअं णिवेदेमि ।

(उभावुपगम्य)

भो चारुदत्त ! पिअं दे णिवेदेमि ।

[अविहा दास्याःपुत्रेण कुक्कुरेण प्रवेशः कृतः । भवति ! आगच्छ चारुदत्तस्य प्रियं निवेदयामि । भोश्चारुदत्त ! प्रियं ते निवेदयामि ।]

नायकः—(दृष्ट्वा) किं मे प्रियम् । ननु वसन्तसेना प्राप्ता ।

विदूषकः—ण क्खु वसन्तसेणा, वसन्तसेणाए पत्तो । [न खलु वसन्तसेना, वसन्तसेनया प्राप्तः ।]

नायकः—रदनिके ! किमेतत् ।

चेटी—भट्टिदारअ ! अम्हाणं रुक्खवाडिआपक्खदुवारे सन्धिं छिन्दिअ चोरो पविट्टो । [भर्तृदारक ! अस्माकं वृक्षवाटिकापक्षद्वारे सन्धिं छित्वा चोरः प्रविष्टः ।]

नायकः—किं चोरः प्रविष्टः ।

विदूषकः—भो वअस्स ! सव्वहा तुवं भणासि, मुक्खो मेत्तेओ अपण्डिदो मेत्तेओ त्ति । जं मए सोभणं किदं तं सुवण्णभण्डअं तव हत्थे समप्पअन्तेण । [भो वयस्य ! सर्वथा त्वं भणासि, मूर्खो

मैत्रेयोऽवगिस्तो मैत्रेय इति । ननु मया शोभनं कृतं तत् सुवर्णभाण्ड तत्र हस्ते समर्पयता ।]

नायकः–किं मयता दत्तम् ।

विदूषकः–अहइं । [अयकिम् ।]

नायकः–कस्यां वेलायाम् ।

विदूषकः–अद्धरत्ते । [अर्धरात्रे ।]

नायकः–किमर्धरात्रे । धाटं दत्तम् ।

विदूषकः–भो चारुदत्त ! जं वेळं पडिबुद्धो आसि, तस्सि वेळा सु दिण्णं । [भोश्चारुदत्त ! यस्यां वेलायां प्रतिबुद्ध आसीः, तस्यां वेलायां ननु दत्तम् ।]

नायकः–हन्त हृतं सुवर्णभाण्डकम् ।

विदूषकः–दाणि मे हत्थे पडिच्छिदु अत्तभवं । [इदानीं मम हस्ते प्रयच्छत्वत्रभवान् ।]

नायकः–(आत्मगतम्)

कः श्रद्धास्यति भूतार्थं सर्वो मां तुलयिष्यति ।
शङ्कनीया हि दोषेषु निष्प्रभावा दरिद्रता ॥ १५ ॥

(प्रविश्य)

ब्राह्मणी–रदणिए ! रदणिए ! आअच्छ । णहि सुणादि । कवाडसद्दं दाव करिस्सं । (तथा करोति ।) [रदनिके ! रदनिके ! आगच्छ । नहि शृणोति । कवाटशब्दं तावत् करिस्यामि ।]

चेटी–हं, कवाडसद्दो विअ । भट्टिदारिआ मं सद्दावेदि । (परिक्रम्य) भट्टिदारिए ! इअ म्हि । [हं, कवाटशब्द इव । भर्तृदारिका मां शब्दापयति । भर्तृदारिके ! इयमस्मि ।]

ब्राह्मणी–ण परिक्खदो ण वावादिदो अय्यउत्तो अय्यमेत्तेओ वा । [न परिक्षतो न व्यापादित आर्यपुत्र आर्यमैत्रेयो वा ।]

चेटी–कुसली भट्टिदारओ आदंसेदि अ । जो तस्स जणस्स अज्जुगो णामेण गहीदो [कुशलो भर्तृदारक आदर्शयति च । धस्माय जनस्याञ्जुनमोरेण गृहीत ।]

सागरिका–किं अज्जवि णामेण गहीदो सि [किं अद्यापि नाम्ना गृहीत इति ।]

चेटी–अह इं । [अथ किं ।]

सागरिका–किंणु क्खु तस्स जणस्स दादव्वं भविस्सदि । अहव एद दइस्स । (कण्ठं गृहीत्वा) हद्धि ताल्लिपत्त क्खु एदं । सो दाणिं परिअणो मं विडम्बेदि । किं दाणिं करिस्सं । (विचिन्त्य । भोदु, दिट्ठं । मम क्खादिकुलजादो लद्धा सदसहस्समुल्ला मुत्तावली । तं पि अत्थउत्तो सोदीरज्जेण पडिच्छदि । भोदु, एवं दाव करिस्सं । (निष्क्रान्ता) [किंनु खलु तस्मै जनाय दातव्यं भविष्यति । अथवैतद् दास्यामि । हा धिक् ताल्पत्रं खल्वेतत् । स इदानीं परिजनो मां विडम्बयति । किमिदानीं करिष्यामि । भवतु, दृष्टम् । मम ख्यातिकुलाद् लब्धा शतसहस्रमूल्या मुक्तावली । तामप्यार्यपुत्र सौटीर्यतया प्रतीच्छति । भवतु, एवं तावत् करिष्यामि ।]

विदूषक–इमस्स अन्धआरप्पादिस्स अवराहस्स किदे भवन्तं सीसेण पसादेमि । दाणिं मे हत्थे पडिच्छदु अत्तभवं । [अस्यान्धकारोत्पादितस्यापराधस्य कृते भवन्तं शीर्षेण प्रसादयामि । इदानीं मे हस्ते प्रतीच्छत्वत्रभवान् ।]

नायकः–किं भवानिदानीं मां बाधते ।

भवान्मायद्विभागी हीरको मम नित्यशः ।
किं पुनः स कलाजीवी वसन्तापण्डितो जनः ॥ १६ ॥

विदूषकः–सच्चं मए मन्दभाग्गेण कुम्भीलस्स हत्थे दिण्णं । (निश्वसिति ।) [सत्यं मया मन्दभाग्येन कुम्भीलस्य हस्ते दत्तम् ।]

(प्रविश्य)

ब्राह्मणी–रदणिए! अय्यमेत्तेअं सद्दावेहि। [रदनिके! आर्यमैत्रेयं शब्दापय।]

चेटी–अय्यमेत्तेअ! भट्टिदारिआ तुमं सद्दावेदि। [आर्यमैत्रेय! भर्तृदारिका त्वां शब्दापयति।]

विदूषकः–भोदि! किं मं। [भवति! किं माम्।]

चेटी–आम। [आम।]

विदूषकः–एस आअच्छामि। (उपसर्पति।) [एष आगच्छामि।]

ब्राह्मणी–अय्यमेत्तेअ! इमं पडिग्गहं पडिगण्ह। [आर्यमैत्रेय! इमं प्रतिग्रहं प्रतिगृहाण।]

विदूषकः–अवत्थाविरुद्धो खु अअं पदाणविभवो। कुदो एदस्स आगमो। [अवस्थाविरुद्धः खल्वयं प्रदानविभवः। कुत एतस्यागमः।]

ब्राह्मणी–णं सट्ठिं उववसामि। सव्वसारविभवेण बम्हणेण सोत्थि वाआइदव्वं त्ति एसो इमस्स आगमो। [ननु षष्ठीमुपवसामि। सर्वसारविभवेन ब्राह्मणेन स्वस्ति वाचयितव्यमित्येषोऽस्यागमः।]

विदूषकः–अट्ठमी खु अज्ज। [अष्टमी खल्वद्य।]

ब्राह्मणी–पमादादो अदिक्कमो किदो। अज्ज पूआ णिव्वत्तीअदि। [प्रमादाद् अतिक्रमः कृतः। अद्य पूजा निर्वर्त्यते।]

विदूषकः–अणणुकम्पदाए पदाणस्स अणुक्कोसो विअ पडिभादि। (जनान्तिकम्) रदणिए! किं करिस्सं। [अननुकम्पतया प्रदानस्यानुक्रोश इव प्रतिभाति। रदनिके! किं करिष्यामि।]

चेटी–(आत्मगतं) किंणु खु मम जणस्स दादव्वं भविस्सदि त्ति एदिणामित्तेण भट्टिदारओ सन्तप्पदि त्ति भट्टिदारिआ तव हत्थे दइअ अप्पदाणं अणिच्छिदं करिस्सादि त्ति एवं करेदि। मा सन्द-

एदं । [किन्तु खलु तस्मै जनाय दातव्यं भविष्यतीत्येतन्निमित्तं भर्तृदारकः संतप्यत इति भर्तृदारिका तव हस्ते दक्षार्थपुण्यमनूणं करिष्यामीत्येवं
१० करोति । तद् गृहाणैतत् ।]
ब्राह्मणी–उदअसम्भवदाए मुत्तावलीए तव अ दुल्लहदाए उवआरो विस्सरिदो । गण्ह एदं । (ददाति ।) [उदकसम्भवतया मुक्ता-
११ वल्यास्तव च दुर्लभतयोपचारो विस्मृतः । गृहाणैतत् ।]
विदूषकः–(गृहीत्वा) सव्वं दाव चिट्ठदु । रोदिदी विअ होदीए दिट्ठी । [सर्वं तावत् तिष्ठतु । रोदितीव भवत्या दृष्टिः ।]
१६ ब्राह्मणी–देवउलधूमेण रोदाविदा । [देवकुलधूमेन रोदिता ।]
विदूषकः–सावित्तासि तत्तहोदा चारुदत्तेण, जइ अलिअं भणासि । [शापितासि तत्रभवता चारुदत्तेन, यद्यलीकं भणसि ।]
१९ ब्राह्मणी–हद्धि । (निष्क्रान्ता ।) [हा धिक् ।]
विदूषकः–एसा बाआए दुक्खं रक्खिअ अस्सूहिं सूइअ गआ । (उपगम्य) भो ! इदं । [एषा वाचा दुःखं रक्षित्वाश्रुभिः सूचयित्वा
४१ गता । भो ! इदम् ।]
नायकः–किमेतत् ।
विदूषकः–सरिसकुलदारसङ्गहस्स फलं ।
४५ फलम् ।]
नायकः–किं ब्राह्मणी मामनुकम्पते ।
विदूषकः–एवं विअ । [एवमिव ।]
४८ नायकः–धिगात्मानम् । अद्य हतोऽस्मि ।
मयि द्रव्यक्षयक्षीणे स्त्रीद्रव्येणानुकम्पितः ।
अर्थतः पुरुषो नारी या नारी सार्थतः पुमान् ॥ १७ ॥
विदूषकः–तत्तहोदी हिअएण तुमं याचेदि । अहं सीसेण याचेमि । गण्ह एदं । [तत्रभवती हृदयेन त्वां याचते । अहं शीर्षेण याचे ।
१ गृहाणैतत् ।]

नायकः—तथा। (गृहीत्वा) वयस्य ! इमां मुक्तावलीं गृहीत्वा वसन्तसेनायाः सकाशं गच्छ।

अर्थेषु काममुपलभ्य मनोरथो मे
क्षीणां धनेष्वनुचितं प्रणयं करोति।
माने च कार्यकरणे च विलम्बमानो
धिग् भोः ! कुलं च पुरुषस्य दरिद्रतां च॥ १८॥

विदूषकः—अहो अप्पमुल्लस्स सुवण्णभण्डअस्स किदे सदसहस्समुल्ला मुत्तावळी णीआदइदव्वा। [अहो अल्पमूल्यस्य सुवर्णभाण्डकस्य कृते शतसहस्रमूल्या मुक्तावली निर्यातयितव्या।]

नायकः—वयस्य ! मा मैवम्।

यं समालक्ष्य विश्वासं न्यासोऽस्मासु कृतस्तया।
तस्यैतन्महतो मूल्यं प्रत्ययस्य प्रदीयताम्॥ १९॥

(निष्क्रान्ताः सर्वे।)

तृतीयोऽङ्कः।

अथ चतुर्थोऽङ्कः।

(ततः प्रविशति सोत्कण्ठा वसन्तसेना, चित्रफलकामादाय वर्तिकाकरण्डहस्ता चेटी च।)

गणिका—हञ्जे ! पेक्खमि सरिसो तस्स जणस्स। [हञ्जे ! पश्यसि सदृशस्तस्य जनस्य।]

चेटी—अज्जुए ! तस्सिं हत्थिविमद्दकोळाहळे बहुमाणपय्यस्थाए दिट्ठीए दूरदो दिट्ठो सो भट्टिदारओ ईदिसो एव्व। [आर्यके ! तस्मिन् हस्तिविमर्दकोलाहले बहुमानपर्यस्तया दृष्ट्या दूरतो दृष्टः स भर्तृदारक ईदृश एव।]

गणिका—तुमं दाव दक्खो वेसवासमजणो त्ति जणवादं पुरतान्ती अलिअं भणासि । [त्वं तावद् दक्षो वेशवासजन इति जनवादं पुरस्कुर्वतीदं भणसि ।]

चेटी—किं णाम वेसवासजणो सव्वो दक्खिणो होइ त्ति । पेक्खदु अज्जुआ चम्पआरामे विउमन्दा जाअन्ति । अहिमदेण त्ति मम हिअअं अहिरमदि । परमत्यदो णत्थ पसंसीअदि, णं कामदेवो । [किमेतद् वेशवासजनः सर्वो दक्षिणो भवतीति । पश्यत्वज्जुका चम्पकारामे विउमन्दा जायन्ते । अभिमता इति मम हृदयमभिरमते । परमार्थेन एव प्रशस्यते, ननु कामदेवः ।]

गणिका—हञ्जे ! महीअणेण अवहसणीअत्तणं अत्तणो परिहरामि । [हञ्जे ! सर्वजनेनापहसनीयत्वमात्मनः परिहरामि ।]

चेटी—णाई जुत्तइ । महीजणसवत्तिओ गणिआजणो णाम । [एतद् युज्यते । सर्वजनसपत्नीको गणिकाजनो नाम ।]

(तत: प्रविशत्याभरणहस्तापरा चेटी ।)

चेटी—हाई अज्जुआए । [सुखमज्जुकायाः ।]

गणिका—हञ्जे ! साअदं दे । [हञ्जे ! स्वागतं ते ।]

चेटी—अज्जुए ! अत्ता आणवेदि—इदं दुवारं पविट्ठ पोक्खरं उवाअभिदं पवहणं । ता सुवण्णाभरणआ गहीदावउण्ठणा आअच्छदु त्ति । इह अलङ्कारं अलङ्करेदु अज्जुआ । [अज्जुके ! अम्बाज्ञापयति—इदं द्वारं प्रविष्टं पौष्करसुवर्णितं प्रवहणम् । तत् स्वर्णाभरणमण्डना गृहीतावगुण्ठनागच्छत्विति । इहालङ्कारमलङ्करोत्वज्जुका ।]

गणिका—किं अय्यचारुदत्तो मण्डइस्सदि । [किमार्यचारुदत्तो मण्डयिष्यति ।]

चेटी—णहि, जेण अलङ्कारो पेसिदो सो राअस्सालो संट्ठाणो। [नहि, येनालङ्कारः प्रेषितः स राजश्यालः संस्थानः।]

गणिका—अवेहि अविणीदे !। [अपेह्यविनीते !।]

चेटी—पसीदटु पसीदटु अज्जुआ। मन्देमं क्खु अहं मन्तेमि। (पादयोः पतति।) [प्रसीदतु प्रसीदत्वज्जुका। मन्देनं खल्वहं मन्त्रये।]

गणिका—उट्ठेहि उट्ठेहि। कुसन्देसं असूआमि, ण तुवं। [उत्तिष्ठोत्तिष्ठ। कुसन्देशमसूयामि, न त्वाम्।]

चेटी—किं अहं अण्णं भणामि। [किमहमन्यद् भणामि।]

गणिका—भणेहि अण्णं—जदा अय्यचारुदत्तो अभिसारइदव्वो तदा मण्डेमि त्ति। [भणान्यद्—यदार्यचारुदत्तोऽभिसारयितव्य-स्तदा मण्डयामीति।]

चेटी—तह। (निष्क्रान्ता।) [तथा।]

(ततः प्रविशति सज्जलकः।)

सज्जलकः—

कृत्वा निशायां वचनीयदोषं निद्रां च हित्वा तिमिरं भयं च।
स एव सूर्योदयमन्दवीर्यः शनैर्दिवाचन्द्र इवास्मि भीतः॥ १॥

दिष्ट्या कर्मान्ते प्रभातम्। यावदिदानीं वसन्तसेनायाः परिचारिकाया मदनिकाया निष्क्रयार्थं मयेदं कृतम्। (परिक्रम्य) इदं वसन्तसेनाया गृहम्। यावत् प्रविशामि। (प्रविश्य) किन्तु खल्वभ्यन्तरस्था मदनिका। अथवा, पूर्वाह्णे गणिकानामभ्यन्तरे सान्निध्यम्। अतस्तत्रैव तया भवितव्यम्। यावच्छब्दापयामि। मदनिके ! मदनिके !।

चेटी—(आकर्ण्य) सज्जलअस्स विअ सरो। वावुदा अज्जुआ। ता उवसप्पिस्सं। (उपगम्य) इअम्हि। [सज्जलकस्येव स्वरः। व्यापृता-ज्जुका। तदुपसर्पिष्यामि। इयमस्मि।]

अयं तव शरीरस्य प्रमाणादिव निर्मितः ।
अप्रकाश्यो ह्यलङ्कारो मत्स्नेहाद् धार्यतामिति ॥ २ ॥

चेटी—पेक्खामि दाव । [पश्यामि तावत् ।]

सज्जलकः—गृह्यताम् । (दर्शयति ।)

चेटी—दिट्ठपुव्वो विअ अअं अलङ्कारो । [दृष्टपूर्व इवायमलङ्कारः ।]

गणिका—ममकेरओ विअ अअं अलङ्कारो । [मदीय इवायमलङ्कारः ।]

चेटी—भणाहि भणाहि । को इमस्स आअमो । [भण भण । कोऽस्यागमः ।]

सज्जलकः—त्वत्स्नेहान् साहसं कृतम् ।

उभे—हं, साहसिओ । [हं, साहसिकः ।]

चेटी—(आत्मगतम्) आ, अज्जुआए खु इमस्स आदरी कम्मदारुणदाए उव्वेअणीआ संवुत्ता । (प्रकाशम्) हद्धि मम किदे उभअं संसइदं संवुत्तं—तव सरीरं चारित्तं च । [आ, अज्जुकायाः सत्वस्याकृतिः कर्मदारुणतयोद्वेजनीया संवृत्ता । हा धिग् मम कृते उभयं संशयितं संवृत्तं—तव शरीरं चारित्रं च ।]

सज्जलकः—उन्मत्तिके ! साहसे खलु श्रीर्वसति ।

चेटी—अपण्डिदो खु सि । को हि णाम जीविदेण सरीरं विक्किणिस्सदि । अह कस्स गेहं इअं विस्सासवञ्चणा किदा । [अपण्डितः खल्वसि । को हि नाम जीवितेन शरीरं विक्रेष्यति । अथ कस्य गेहे इयं विश्वासवञ्चना कृता ।]

सज्जलकः—यथा प्रभाते मया श्रुतं—श्रेष्ठिचत्वरे प्रतिवसति सार्थवाहपुत्रश्चारुदत्तो नाम ।

उभे—हुम् ।

सज्जलकः—अयि,

विषादस्रस्तसर्वाङ्गी सम्भ्रमोत्फुल्ललोचना।
मृगीव शरविद्धाङ्गी कम्पसे चानुकम्पसे ॥ ३ ॥

चेटी—सर्व भणाहि। सत्थवाहकुले साहसं करन्तेण तुए कोवि कुलपुत्तो सत्थेण अत्थि परिक्खदो वावादिदो वा। [सर्वं भण।
२ सार्थवाहकुले साहसं कुर्वता त्वया कश्चित् कुलपुत्रः शस्त्रेणास्ति परिक्षतो व्यापादितो वा।]

गणिका—सुट्ठु, मए वि पुच्छिदव्वं एदाए पुच्छिदं। [सुष्ठु, मयापि
६ प्रष्टव्यमेतया पृष्टम्।]

सज्जलक—मदनिके! एतावत् किं न पर्याप्तं, द्वितीयमप्यकार्यं करिष्यामि। न खल्वत्र शस्त्रेण कश्चित् परिक्षतो व्यापादितो वा।
८ चेटी—सज्जलअ! सच्चं। [सज्जलक! सत्यम्।]

सज्जलक—सत्यम्।

चेटी—साहु सज्जलअ! पिअं मे। [साधु सज्जलक! प्रियं मे।]
१२ सज्जलक—किं किं प्रियमित्याह। ईदृशी मदनिके!

स्वस्नेहबद्धहृदयो हि करोम्यकार्यं
सद्वृत्तपूर्वपुरुषेऽपि कुले प्रसूत।
रक्षामि मन्मथगृहीतमिदं शरीरं
मित्रं च मां व्यपदिशस्यपरं च यासि ॥ ४ ॥

चेटी—सज्जलअ! सुणाहि। अज्जुआए अअं अलङ्कारो। (कर्णे।)
एव्वं विअ। [सज्जलक! शृणु। आर्याया अयमलङ्कारः।
२ एवमिव।]

सज्जलक—एवम्।

अज्ञानाद् या मया पूर्वं शाखा पत्रैर्वियोजिता।
छायार्थी ग्रीष्मसन्तप्तस्तामेव पुनराश्रितः ॥ ५ ॥

गणिका–मन्तप्पदि त्ति तक्केमि एदेण अकय्यं किदं त्ति। [मन्त्यत इति तर्कयामि एतेनाकार्यं कृतमिति।]

सज्जलकः–मदनिके ! एवं गते किं कर्तव्यम्।

चेटी–तहिं एव णिय्यादेहि, णहि मण्डइस्सदि अज्जुआ। [तत्रैव निर्यातय, नहि मण्डयिष्यत्यज्जुका।]

सज्जलकः–अथेदानीं सोऽस्मान्मां चोर इति रक्षिपुरुषैर्ग्राहयिष्यति चेदत्र किं करिष्यामि।

चेटी–मा भाआहि मा भाआहि। कुलउत्तो क्खु सो गुणाणं परितुस्सदि। [मा बिभीहि मा बिभीहि। कुलपुत्रः खलु स गुणानां परितुष्यति।]

गणिका–साहु भद्दे ! अवत्तव्वामि, अलङ्किदा विअ एदेण वअणेण। [साधु भद्रे ! अवक्तव्यास्मि, अलङ्कृतेवैतेन वचनेन।]

सज्जलकः–सर्वथा न शक्ष्याम्यहं तत्र गन्तुम्।

चेटी–अअं अण्णो उवाओ। [अयमन्य उपायः।]

गणिका–एदे गुणा वेसवासस्स। [एते गुणा वेशवासस्य।]

सज्जलकः–कोऽन्य उपायः।

चेटी–ण तव रूपञ्जा अज्जुआ अवि सत्थवाहपुत्तो अ। [न तव रूपज्ञाज्जुकापि सार्थवाहपुत्रश्च।]

सज्जलकः–न खलु।

चेटी–तेण हि इमं दाव अलङ्कारं तस्स सत्थवाहपुत्तस्स वअणा अज्जुआए णिय्यादेहि। एवं च किदे तुवं रक्खिददो, सो अय्य अ आणिव्विण्णो भविस्सदि। अहं च पीडिदा ण भविस्सं। आ अज्जुअं च पुणो वञ्चिअ पुणो एव्व दासभावो भवे। [तेन हि तावदलङ्कारं तस्य सार्थवाहपुत्रस्य वचनादज्जुकायै निर्यातय। एवं कृते त्वं रक्षितः, स आर्यश्चानिर्विण्णो भविष्यति। अहं च पीडिता भविष्यामि। अथवा अज्जुकां च पुनर्वञ्चयित्वा पुनरेव दासभावो भवेत्।

मज्जलकः—मदनिके ! प्रीतोऽस्मि ।

गणिका—भोदु अब्भन्तरं पविसिअ उवविसामि । (तथा करोति ।) [भवत्वभ्यन्तरं प्रविश्योपविशामि ।]

चेटी—सज्जलअ ! आअच्छ, कामदेवउले मं पडिवालेहि । अहं ओसरं जाणिअ अज्जुआए णिवेदेमि । [सज्जलक ! आगच्छ, कामदेवकुले मां प्रतिपालय । अहमवसरं ज्ञात्वाऽज्जुकायै निवेदयामि ।]

सज्जलकः—बाढम् । (निष्क्रान्तः ।)

(ततः प्रविशत्यपरा चेटी ।)

चेटी—अज्जुए ! अज्जुआए ! एसो सत्थवाहपुत्तस्स सआसादो कोवि बम्हणो आअदो अज्जुअं पेक्खिदुं । [अज्जुके ! अज्जुकायाः । एष सार्थवाहपुत्रस्य सकाशात् कश्चिद् ब्राह्मण आगतोऽज्जुकां द्रष्टुम् ।]

गणिका—(सादरम्) गच्छ, सिग्घं पवेसेहि णं । [गच्छ, शीघ्रं प्रवेशयैनम् ।]

चेटी—तह । (उपसृत्य) एदु एदु अय्यो । [तथा । एत्वेत्वार्यः ।]

(प्रविश्य)

विदूषकः—(सर्वतो विलोक्य) अहो गणिआवाडस्स सस्सिरीअदा । णाणापट्टणसमागदेहिं आअमिएहिं पुत्थआ वाईअन्ति । संजोअअन्ति अ आहारप्पआराणि । वीणा वादीअन्ति । सुवण्णआरा अलङ्कारप्पआराणि आदरेण जोजअन्ति । [अहो गणिकावाटस्य सश्रीकता । नानापट्टणसमागतैरागमिकैः पुस्तकानि वाच्यन्ते । संयोज्यन्ते चाहारप्रकाराः । वीणा वाद्यन्ते । सुवर्णकारा अलङ्कारप्रकारानादरेण योजयन्ति ।]

चेटी—एसा अज्जुआ । उवसप्पदु अय्यो । [एषाज्जुका । उपसर्पत्वार्यः ।]

विदूषकः—(उपगम्य) सोत्थि होदीए । [स्वस्ति भवत्यै ।]

गणिका—साअदं अय्यस्स। हञ्जे! आसणं अय्यस्स, पादोदअं च। [स्वागतमार्यस्य। हञ्जे! आसनमार्यस्य, पादोदकं च।]

विदूषकः—(आत्मगतम्) सव्वं आणेदु वज्जिअ भोअणं। [सर्वमानयतु वर्जयित्वा भोजनम्।]

चेटी—जं अज्जुआ आणवेदि। (आसनं ददाति पादोदकं च।) उवविसदु अय्यो। [यदज्जुकाज्ञापयति। उपविशत्वार्यः।]

विदूषकः—(उपविश्य) पडिच्छदु आसणं भोदी। अहं किंचि भणिदुं आअदो। [प्रतीच्छत्वासनं भवती। अहं किञ्चिद् भणितुमागतः।]

गणिका—(उपविश्य) अवहिदम्हि। [अवहितास्मि।]

विदूषकः—केत्तिअमत्तं खु तस्स अलङ्कारस्स मुल्लप्पमाणं। [कियन्मात्रं खलु तस्यालङ्कारस्य मूल्यप्रमाणम्।]

गणिका—किंणिमित्तं खु अय्यो पुच्छदि। [किंनिमित्तं खल्वार्यः पृच्छति।]

विदूषकः—सुणादु भोदी। तत्तहोदो चारुदत्तस्स गुणप्पखापणणिमित्तं खु तुए अलङ्कारो तहिं णिक्खित्तो। सो तेण जूदे हारिदो। [शृणोतु भवती। तत्रभवतश्चारुदत्तस्य गुणप्रख्यापननिमित्तं खलु त्वयालङ्कारस्तस्मिन् निक्षिप्तः। स तेन द्यूते हारितः।]

गणिका—जूदे। जुज्जइ। तदो तदो। [द्यूते। युज्यते। ततस्ततः।]

विदूषकः—तदो तस्स अलङ्कारस्स मुल्लभूदं इमं मुत्तावलिं पडिच्छदु भोदी। [ततस्तस्यालङ्कारस्य मूल्यभूतामिमां मुक्तावलीं प्रतीच्छतु भवती।]

गणिका—(आत्मगतम्) किं णु खु गणिआभावं। दुद्दमि मे गुढ-खदि। जइ ण पडिच्छे, मा एव्व दोसो भविस्सदि। (प्रकाशम्)

७५ आणेदु अय्यो । [धिक् खलु गणिकाभावम् । तुच्छेति मां तुलयति । यदि न प्रतीच्छामि, स एव दोषो भविष्यति । आनयत्वार्य ।]
विदूषकः–इद गण्हदु भोदी । [इद गृह्णातु भवती ।]
७८ गणिका–(गृहीत्वा) पडिच्छिदं मए त्ति अय्यो णिवेदेदु । [प्रतीष्टं मयेत्यार्यो निवेदयतु ।]
विदूषकः–(आत्मगतम्) कोवि उवआरो वि ण एदाए भणिदो ।
८१ (प्रकाशम् ।) एवं होदु । (इत्वा निष्क्रान्त ।) [कोऽप्युपचारोऽपि नैतया भणित. । एवं भवतु ।]
गणिका–साहु चारुदत्त ! साहु । भाअधेअपरिवुत्तदाए दसाए
८४ माणावमाणं रक्खिदं । [साधु चारुदत्त ! साधु । भागधेयपरिवृत्तायां दशायां मानावमानं रक्षितम् ।]
(प्रविश्य)
८७ मदनिका–अज्जुए ! सत्थवाहपुत्तस्स सआसादो कोवि मणुस्सो आअदो इच्छइ अज्जुअं पेक्खिदुं । [अज्जुके ! सार्थवाहपुत्रस्य सकाशात् कश्चिद् मनुष्य आगत इच्छत्यज्जुकां द्रष्टुम् ।]
९० गणिका–किं दिट्ठपुरुवो णवदंसणो वा । [किं दृष्टपूर्वो नवदर्शनो वा ।]
मदनिका–अज्जुए ! णहि, तस्स परिअणो त्ति मे पडिभादि । [अज्जुके ! नहि, तदीय इति मे प्रतिभाति ।]
९३ गणिका–गच्छ, पवेसेहि णं । [गच्छ, प्रवेशयैनम् ।]
मदनिका–तह । (निष्क्रान्ता ।) [तथा ।]
गणिका–अहो रमणिज्जदा अज्ज दिवसस्स । [अहो रमणीयतास्य
९६ दिवसस्य ।]
(ततः प्रविशति मदनिका सज्जलकेन सह ।)
सज्जलकः–एषा स्वल्पाभशङ्का नाम,
यः कश्चिच्चकितगतिर्निरीक्षते मां सम्भ्रान्तो द्रुतमुपसर्पति स्थितो वा ।
सर्वांस्तांस्तुलयति दोषतो मनो मे स्वैर्दोषैर्भवति हि शङ्कितो मनुष्यः ॥६॥

मदनिका–एसा अज्जुआ। उवसप्पदु अय्यो। [एषाज्जुका। उपसर्पत्वार्यः।]

सज्जलकः–(उपसृत्य) सुखं भवत्यै।

गणिका–साअदं अय्यस्स। हञ्जे! आसणं देदु अय्यस्स। [स्वागतमार्यस्य। हञ्जे! आसनं दीयतामार्याय।]

सज्जलकः–भवतु भवतु। गृहीतमासनम्। त्वरिततरमनुष्ठेयं किञ्चित् कार्यमस्ति।

गणिका–एवं, भणादु अय्यो। [एवं, भणत्वार्यः।]

सज्जलकः–आर्यचारुदत्तेनास्मि प्रेषितः–यस्तावदलङ्कारो मम हस्ते निक्षिप्तः, स त्वसंभोगमलिनतया गृहस्यासान्निध्यात् कौटुम्बिकानां दुरारक्षः। तद् गृह्यताम् इति।

गणिका–इमं तस्स चारुदत्तस्स देदु अय्यो। [इमं तस्मै चारुदत्ताय ददात्वार्यः।]

सज्जलकः–भवति! न खल्वहं गच्छामि।

गणिका–अहं जाणामि तस्स गेहे साहसं करिअ आणीदो अअं अलङ्कारो। तस्स गुणाणि अणुकम्पेदु अय्यो। [अहं जानामि तस्य गेहे साहसं कृत्वानीतोऽयमलङ्कारः। तस्य गुणाननुकम्पतामार्यः।]

सज्जलकः–(आत्मगतम्) कथं विदितोऽस्म्यनया।

गणिका–को एत्थ, पवहणं दाव अय्यस्स। [कोऽत्र, प्रवहणं तावदार्यस्य।]

मदनिका–णेमिसद्दो विअ सुणीअदि। आअदेण पवहणेण होदव्वं [नेमिशब्द इव श्रूयते। आगतेन प्रवहणेन भवितव्यम्।]

गणिका–(सङ्गमरणैर्मदनिकामलङ्कृत्य) आरुहदु अय्यो अय्याए सह पवहणं। [आरोहत्वार्य आर्यया सह प्रवहणम्।]

मदनिका–अज्जुए! किं एदं। [अज्जुके! किमेतत्।]

गणिका—मा खु मा खु एव्व भणिअ। अज्जा क्खु मि दाणिं संवुत्ता। गण्हदु अज्जो। (मदनिकां गृहीत्वा सज्जलकाय प्रयच्छति।) [मा खलु मा खल्वेव मन्त्रयित्वा। आर्या खल्विदानीं संवृत्ता। गृह्णात्वार्यः।]

सज्जलकः—(आत्मगतम्) भोः! कदा खल्वस्याः प्रतिकर्तव्यं भविष्यति। अथवा, शान्तं शान्तं पापम्।

नरः प्रत्युपकारार्थी विपत्तौ लभते फलम्।
द्विषतामेव कालोऽस्तु योऽस्या भवतु तस्य वा ॥ ७ ॥

(तया सह निष्क्रान्तः सज्जलकः।)

गणिका—चदुरिए!। [चतुरिके!।]

(प्रविश्य)

चेटी—अज्जुए! इअम्हि। [आर्ये! इयमस्मि।]

गणिका—हञ्जे! पेक्ख आअस्सीए मए सिविणो दिट्ठो। एवं। [हञ्जे! पश्य आगामिन्या मया स्वप्नो दृष्टः एवम्।]

चेटी—पिअं मे, अमुदंकणाइअं संवुत्तं। [प्रियं मे, अमृतनाटकं संवृत्तम्।]

गणिका—एहि इमं अलङ्कारं गण्हिअ अज्जचारुदत्तं अभिसरिस्सामो। [एहीममलङ्कारं गृहीत्वार्यचारुदत्तमभिसरिष्यावः।]

चेटी—अज्जुए! तह। एदं पुण अभिसारिआसहाअभूदं दुद्दिणं उण्णमिदं। [आर्ये! तथा। एतत् पुनरभिसारिकासहायभूतं दुर्दिनमुन्नमितम्।]

गणिका—हदासे! मा हु बड्ढावेहि। [हताशे! मा खलु वर्धय।]

चेटी—एदु एदु अज्जुआ। [एत्वेत्वार्या।]

(निष्क्रान्ते।)

चतुर्थोऽङ्कः।

चारुदत्तस्य श्लोकानुक्रमणिका ।



CĀRUDATTA

TRANSLATION

Act I

PROLOGUE

(At the end of the Benediction enter the Stage-manager.)

STAGE-MANAGER—I left my house just at dawn today and now my eyes are as it were rolling with hunger like two drops of water on a lotus-leaf! *(Walking about)* So I will go home and see if there is any arrangement made. *(Moving about)* This is our house. So I will go in. *(Entering and turning round)* As the floor has been blackened and variegated by the turning round of iron pots and there is the scent like the unctious smell of grease when being purified, and here are pious devotees moving about like some auspicious omen, so is it likely that arrangements (of a meal) are ready? Or that in my hunger the whole world appears to me to be made of rice? I will just call my wife. Madam, will you come here a moment?

(Entering)

ACTRESS—Here I am, sir; it is a good thing you have come.

STAGE-MANAGER—Madam, is there anything for breakfast in our house?

ACTRESS—Yes, sir.

STAGE-MANAGER—May you live long! thus may you be (ever) the giver of good food!

ACTRESS—Sir, I have been waiting just for you.

STAGE-MANAGER—Well, dear, is there what I want?

ACTRESS—Yes, sir.

STAGE-MANAGER—So may the gods bless you! Now what have you got, my dear?

ACTRESS—There is ghee, raw sugar, curds and rice.

STAGE-MANAGER—All this in our house?

ACTRESS—No, no, in the market.

STAGE-MANAGER—(*Angrily*) Oh, you vile woman, so may your hopes be cut off! And you shall go to perdition I am like a sheaf of grass lifted high up from the hill-top by a fierce wind and then let fall again.

ACTRESS—Well, well, do not be alarmed. Wait a while, sir. Everything will be ready Why, I have already got it. You will please assist me, sir, in my fast today.

STAGE-MANAGER—What is the name of this fast of yours madam?

ACTRESS—It is a fast to get a worthy husband.

STAGE-MANAGER—What, in the next life?

ACTRESS—Quite so

STAGE-MANAGER—Let all that be But who has advised you to adopt this fast?

ACTRESS—This pious man, Cūrnagoṣṭha.

STAGE-MANAGER—Well done, Cūrnagoṣṭha, well done.

ACTRESS—If you will favour me, sir, then I should like to invite some Brāhmana worthy of our company.

STAGE-MANAGER—A most pious command. So shall I get a good breakfast too Well then, you go in, madam, and I, on my part, will find a Brāhmana worthy of our company

ACTRESS—As you command, sir (*Exit*)

STAGE-MANAGER—Where can I find a poor Brāhmaṇa? (*Looking*) Ah, here comes the noble Maitreya, the Brāhmaṇa who is Cārudatta's friend So I will invite him (*Moving round*) Sir, I invite you In this matter of invitation, do not despise me on the ground of

my poverty There will be rich food to eat There is ghee raw sugar curds rice, everything besides, you will have a gift of gold pieces, too

(*Behind the scenes*)

Well well, invite somebody else I am not free

STAGE-MANAGER Please to enjoy, good sir, this rice, well prepared with butter and raw sugar and curds, and served with hot curry and condiments, this exquisite rice offered with great respect (1) (*Exit*)

End of Prologue

(*Then enter the Vidūṣaka.*)

VIDUṢAKA—Well well invite some one else I am not free Well, I say I am not free. What say you? There will be rich food to eat? Well, but I know one would not eat the stone of the very sweetest mango, because that is improper Now why would you keep on importuning me? I say I am engaged What say you—'There will be a gift of gold coins?'

Ah, he appears to be repudiated in words (only) but my heart follows him Oh, misery! That even I should be looking for the invitations of others! I used to pass my days in Cārudatta's house ruminating savoury sweetmeats like a bull at the cross-roads, stuffed up to my very throat, surrounded by a variety of dishes like a painter by numerous pans of paint-dishes that were kept ready throughout the twenty-four hours, seasoned with assafœtida, emitting a sweet fragrance at each breath, commanded by a mere lift of the brow, with numerous drinks thrown in, but the same I, now that the noble Cārudatta is poor, must live the life of common people, like the pigeons, moving about elsewhere for my food and then returning to his house.

3

And there is another wonderful thing: my bell understands the changed condition. It is satisfie with quite a little and it will bear a good weight o rice when it is offered. It does not demand what i not offered, nor reject (what is offered). Not that am not satisfied with such a state of affairs.

Here I have got for the noble Cārudatta, who has performed the religious duties (pertaining) to the sixth day these flowers and this upper garment, so I will be by his side. (*Stepping around and looking*) Here is the noble Cārudatta, lovely and yet pitiful like the moon at dawn, stepping this way after worshipping the household deities according to his means. So I will approach him. (*Exit*)

(*Then enter the Hero offering oblation, the Vidūṣaka, and a maid-servant with wood-sorrel in her hands*)

HERO, (*Sighing deeply*)—Oh, poverty is indeed a living death to a high-minded person, for

On this threshold of my house, where swans and flocks of cranes separated the flowers from oblations, just there have grown the sprouts of corn of old oblations; and the handful of seeds offered there is eaten by mouths of worms. (2)

VIDŪṢAKA—Don't you, my friend, worry yourself too much. The young days of a house, like those of a man, are subject to changed conditions. Poverty certainly becomes you who have lost your wealth in charity over the entire land upto the sea, as the loss of light becomes the moon of the dark fortnight.

HERO—Nay, I do not bewail my lost fortune. But the ruin of a man who knows the joys of virtue appears to me to be more frightful, for

Happiness after the experience of misery is glorious

like the sight of a lamp in the midst of darkness, but he who comes to poverty after prosperity lives dead with a body alive (3)

VIDŪṢAKA—Ah! friend where has it all gone such hoards of wealth, the choicest from sea and town?

HERO, (*Sighing*)—Friend, gone where my fortune is sunk See,

My wealth is spent in helping my friends, nor do I remember any one that was refused. This my spirit, however, that has paid the price of confidence, does not perish (4)

(*Gesticulates grief.*)

VIDŪṢAKA—Are you grieving for wealth and prosperity?

HERO—In truth, I am not brooding over the loss of riches, for it can come again with a turn of fortune, but this is what burns me at heart, that with the loss of the splendour of riches, my friendship towards the good becomes relaxed (5)

Moreover, if a man be poor his kinsmen will not abide by his words, his magnanimity becomes ridiculous, and the lustre of the moon of character fades away. Without enmity his friends turn away from him and his difficulties multiply, while the evil deeds that others have done are put upon his head (6)

VIDŪṢAKA—These damnable money transactions are leaving the house like cowherd-boys scared by flies But the more you brood over the sorrow at loss of wealth, the more will it sprout up like each shoot of an old clump of reeds in spring So enough of grieving over it

HERO—Friend, why should I be grieving? Moreover, am I poor

Whose wife will follow my fortunes, and who have a friend in you that will share my joys and woes? —

And what is not found with the poor, I have not lost my magnanimity (7)

(Enter a courtesan in flurry followed by Viṭa and Śakāra)

ŚAKĀRA—Stop, stop Vasantasenā, stop

Why do you go, run, race away stumbling? Well, be pleased, I won't slay you Just stay, my body is now being burnt by love like a bit of leather fallen in the midst of burning cinders (8)

VIṬA—Vasantasenā,

Why, with thy grace transformed in fright, thy feet which through instructions in dancing should lightly trip, (now) falling heavily, why dost thou flee like a gazelle frightened by a tiger's pursuit? Why should thine eyes dart sidelong glances that are tremulous and frightened? (9)

